दीर्घा तु तर्जनी यत्र आश्रिताङ्गुष्ठमूलकम्। पताका सा च विज्ञेया [1]नालिका दूरमोक्षणे॥ ८५॥

—वा० ध०

सिंहकर्णिकमुष्टौ च तर्जनी चेत्प्रसारिता। पताको नाम मुष्टिः स्यान्नलिकास्थूलकाण्डके॥ ११७॥

—मानसोल्लास अ० १ वि० ४

गुणमुष्टिः—तर्जनी, वज्रमुष्टि, सिंहकर्णी, मत्सरी और काकतुण्डी—ये पाँच मुष्टियाँ यथाक्रम शरसन्धान में प्रयुक्त करनी चाहियें॥ ८४॥

पताका—जहाँ पर तर्जनी अङ्गुली सीधी रहे और अंगूठे के मूल में मुड़े, उसे पताका कहते हैं। इसे बन्दूक की गोली चलाने में प्रयुक्त किया जाता है॥ ८५॥


सिंहकर्णमुष्टि में यदि तर्जनी फैली हुई हो तो उसे पताकामुष्टि कहते हैं, इससे नलिका नामक स्थूलकाण्ड छोड़ा जाता है॥ ११७॥

---


१. नालीकशरमोक्षणे इति आकाशभैरवे। —पटल १३५

Scanned by CamScanner


गुणमुष्टि




पताका




वज्रमुष्टि



सिंहकर्णी



मत्सरी



काकतुण्डी



एकलव्य

Scanned by CamScanner

२. वज्रमुष्टिः—

तर्जनीमध्यमामध्यमङ्गुष्ठो विशते यदि। वज्रमुष्टिश्च सा ज्ञेया स्थूलनाराचमोक्षणे॥ ८६॥

—वा० ध०

तर्जन्यावेष्टिताङ्गुष्ठः शेषाः पाणितलेस्थिताः। वज्रमुष्टिरियं ख्याता दृढकर्मणि कोविदैः॥ १२०॥

—मानसोल्लास अ० १ वि० ४

३. सिंहकर्णीः—

अङ्गुष्ठमध्यदेशं तु तर्जन्यग्रं सुसंस्थितम्। सिंहकर्णः स विज्ञेयो दृढ लक्ष्यस्य वेधने॥ ८७॥

—वा० ध०

अङ्गुष्ठपीडितं कुर्यात् तर्जनी नखरं तले। अङ्गुलीत्रितयं स्थाप्यं मुष्टिः स्यात् सिंहकर्णिकः॥ ११६॥

—मानसो० अ० १ वि० ४

अङ्गुष्ठनखमूले तु मध्यमाग्रं सुसंस्थितम्॥ २२॥
सिंहकर्णी तु विज्ञेया वत्सदन्तविमोक्षणे॥ २३॥

—आकाशभैरव पटल १३६

४. मत्सरी—

अङ्गुष्ठनखमूले तु तर्जन्यग्रं सुसंस्थितम्। मत्सरी सा च विज्ञेया चित्रलक्ष्यस्य वेधने॥ ८८॥

—वा० ध०

[1]अङ्गुष्ठनखपृष्ठे च तर्जनी नखरो भवेत्। अधोवर्ती भवेन्मुष्टिः शेषाङ्गुल्योऽत्र पूर्ववत्॥ ११८॥

—मानसोल्लास अ० १ वि० ४

वज्रमुष्टिः—जब तर्जनी और मध्यमा के मध्य में अङ्गुष्ठ लगाकर धनुष की प्रत्यञ्चा खेंची जाये तो उसे वज्रमुष्टि कहते हैं। इससे स्थूल नाराच-बाण छोड़ा जाता है॥ ८६॥

तर्जनी से अङ्गूठे को आवेष्टित (ढककर) करके अन्य अङ्गुलियाँ हथेली की ओर लगी हुई रहती हैं, इसे बुद्धिमानों ने वज्रमुष्टि कहा है। इससे दृढ़ लक्ष्य का भेदन किया जाता है॥ १२०॥

सिंहकर्णीः—अङ्गूठे के मध्य भाग और तर्जनी के अग्रभाग से प्रत्यञ्चा को पकड़ना सिंहकर्णमुष्टि कहलाता है। इसका प्रयोग दृढ़ लक्ष्य भेदन में किया जाता है॥ ८७॥

अङ्गूठे से तर्जनी के नख को दबाये, शेष तीन अङ्गुलियाँ हथेली की ओर मुड़कर स्थिर रहें। इसे सिंहकर्णमुष्टि कहते हैं॥ ११६॥

अङ्गूठे के नख का मूलभाग जब मध्यमा अङ्गुली के अग्रभाग पर स्थित हो तो वह सिंहकर्णमुष्टि जाननी चाहिये, इससे वत्सदन्त बाण छोड़ा जाता है॥

मत्सरी—अङ्गूठे के नख के मूलभाग में तर्जनी का अगला भाग स्थित करने पर मत्सरी मुष्टि जाननी चाहिये। यह चित्र (सूक्ष्म) लक्ष्य को भेदन करने में प्रयुक्त होती है।

अङ्गूठे के नख के पीछे तर्जनी का नख रहे, मुष्टि नीचे की ओर एवं शेष तीन अङ्गुलियाँ पूर्ववत् हथेली में लगी हुई हों तो इसे मत्सरी मुष्टि कहते हैं।

---

१. अस्मिन् श्लोके मुष्टिनाम न प्रदत्तम्। अस्माकं मतेरियं मत्सरी स्यात्।

Scanned by CamScanner

५. काकतुण्डी—

अङ्गुष्ठाग्रे तु तर्जन्याः मुखं यत्र निवेशितम्। काकतुण्डी तु सा ज्ञेया सूक्ष्मलक्ष्ये तु योजिता॥ ८६॥

—वा० ध०

[1]तर्जन्यङ्गुष्ठयोरग्रे श्लिष्टे चेत् पूर्ववत् पुरः। मुचुटी सूक्ष्मनाराच व्यधे मुष्टिः प्रशस्यते॥ ११९॥

—मानसो० अ० १ वि० ४

६. त्रैयम्बक—

पुङ्खस्योर्ध्वमधः स्याच्चेत्तर्जनीमध्यमा स्थिता। तथा पुङ्खमुखेऽङ्गुष्ठो मुष्टिस्त्रैयम्बको मतः॥ १२१॥

७. एकलव्य—

तर्जनीमध्यमामध्ये यत्र पुङ्खः प्रपीड्यते। अनामिका समायोगान्मुष्टिः स्यादेकलव्यकः॥ १२२॥

त्रैयम्बकैकलव्यौ द्वौ तिर्यक्कोदण्डमार्गणे। *—मानसो० अ० १ वि० ४*

आकाशभैरवतन्त्रेऽयमधिकः—

योज्याऽऽलीढे पताकाख्या प्रत्यालीढे तु पार्वति॥ २५॥

वज्रमुष्टिर्विधातव्या विशाखे सिंहकर्णिका। मत्सरी दर्दुरे योज्या गारुडे काकतुण्डिका॥ २६॥

—आ० भै० पटल १३६

धनुर्मुष्टिः[2]

मानसोल्लासे—

धृतचापस्य हस्तस्य तर्जनी प्रोन्नता यदि। तुङ्गो मुष्टिः समाख्यातः सत्युत्ताने शरासने॥ १०९॥

तर्जनी का मुख और अङ्गूठे का अग्रभाग मिलाकर काकतुण्डी मुष्टि जाननी चाहिये। इसे सूक्ष्म लक्ष्य नें प्रयुक्त करते हैं॥ ८६॥

तर्जनी और अङ्गूठे के अग्रभाग को मिलायें, इसे मुचुटी कहते हैं। यह सूक्ष्म लक्ष्य और नाराच बाणों में प्रशस्त है॥ ११९॥

जब बाण का पृष्ठभाग ऊपर से तर्जनी और नीचे से मध्यमा अङ्गुली द्वारा दबाया गया हो और पुंख के मुखप्रदेश (अन्तिम सिरे) पर अङ्गूठा रहे तो इसे त्रैयम्बक मुष्टि कहते हैं॥ १२१॥

जब तर्जनी और मध्यमा से पूर्ववत् बाण को पकड़ा जाता है, मध्यमा के साथ अनामिका लगी रहे तो इसे एकलव्य-मुष्टि कहते हैं॥ १२२॥

एकलव्य मुष्टि और त्रैयम्बक मुष्टि ये दोनों तिरछे शरसन्धान और कोदण्ड धनुष में प्रयुक्त होती है॥ १२३॥

आकाशभैरवतन्त्र में इतना अधिक है—हे पार्वती! आलीढ़ स्थान में पताका मुष्टि को, प्रत्यालीढ़ में वज्रमुष्टि, विशाख में सिंहकर्ण, दर्दुर में मत्सरी और गरुडक्रम में काकतुण्डी मुष्टि का प्रयोग करना चाहिये॥ २५-२६॥


धनुर्मुष्टिः—१. धनुष पकड़े हुए हाथ की यदि तर्जनी अङ्गुली सीधी रहे तो इसे तुङ्गमुष्टि

---


१. मुचुटी सिहंकर्णी च पताका चेति मुष्टयः। —वैजयन्ती कोषः ३।७।१९३
मुचुटी गुणसाम्यात् काकतुण्ड्येव स्यादित्यस्माकं मतम्।

२. [यया मुष्ट्या धनुर्गृह्यते सा धनुर्मुष्टिरुच्यते]

Scanned by CamScanner




धनुर्मुष्टि



समधृत

तुङ्ग






तलाश्रय

उपतुङ्ग



परिमण्डल



सममुष्टि

Scanned by CamScanner

दक्षिणाग्रं यदा चापं तिर्यक् प्रणिहितं भवेत्। उन्नतायां कनिष्ठायां मुष्टिः स्यादुपतुङ्गकः॥ ११०॥
अङ्गुष्ठमुन्नतं कुर्यान्मुष्टौ तं परिमंडले। गुलिकादि व्यचे (धे) तस्य विनियोगं प्रदर्शयेत्॥ १११॥
तर्जन्यङ्गुष्ठयोरग्रे अन्योन्यं परिचुम्बितः। मुष्टिः समधृतो नाम स्थूले धनुषि दृश्यते॥ ११२॥
तलेनाक्रम्यते चापं दृढाकर्षणकर्मणि। मुष्टिस्तलाश्रयो नाम बलिनां सम्प्रदर्श्यते॥ ११३॥
अङ्गुल्यस्तु समाश्चापे यस्मिन्नङ्गुष्ठपीडिताः। सममुष्टिः स विज्ञेयो दृढघाते प्रशस्यते॥ ११४॥
एवं प्रयोगभेदेन चापे मुष्टिं तु षड्विधाम्। प्रयोजयेत् क्रियाकाले चापविद्याविशारदः॥ ११५॥

—मानसो० भाग २ अ० १ वि० ४

धनुर्मुष्टि-सन्धानम्

वाशिष्ठसंहितायाम्—

सन्धानं त्रिविधं प्रोक्तमध ऊर्ध्वं समं सदा। योजयेत् त्रिप्रकारं हि कार्येष्वपि यथाक्रमम्॥ ९०॥
अधश्च दूरपातित्वे समे लक्ष्ये सुनिश्चिते। दृढास्फोटं प्रकुर्वीत ऊर्ध्वसन्धानयोगतः॥ ९१॥

—वा० ध०

मानसोल्लासे—

अङ्गुष्ठभागपार्श्वे तु तर्जन्यां सङ्गते शरे। चापमुष्टौ समे पुङ्खे समसन्धानमुच्यते॥ १४७॥
समसन्धौ रथे ज्यायामधः सन्धानकं भवेत्। तस्मादेवोर्ध्वतः सन्धादूर्ध्वसंधानमिष्यते॥ १४८॥

कहते हैं। यह लेटकर लक्ष्यवेधन करने में प्रयुक्त होती है॥ १०९॥

२—दाहिना पैर आगे होने पर (आलीढ़ स्थान) जब धनुष को तिरछा पकड़ा जाये और कनिष्ठ अङ्गुली सीधी रहे तो इसे उपतुङ्ग मुष्टि कहते हैं॥ ११०॥

३—अङ्गुष्ठ सीधा करने पर परिमण्डल मुष्टि होती है। इसे गुलिका (गुलेल या गोली) छोड़ने में प्रयुक्त किया जाता है॥ १११॥

४—जब तर्जनी और अङ्गूठा परस्पर एक-दूसरे को छू रहे हों तो इसे समधृति मुष्टि कहते हैं। यह मोटे धनुष को पकड़ने में काम आती है॥ ११२॥

दृढ़ धनुष को खींचने के लिये हाथ की हथेली से पकड़कर धनुष को खेंचना तलाश्रय मुष्टि होती है। इसे बलवान् व्यक्ति ही प्रयोग में लाते हैं॥ ११३॥

धनुष को चारों अङ्गुलियों से समान रूप से पकड़कर जब अङ्गूठा उनपर रखा जाये तो इसे सममुष्टि जानना चाहिये। यह दृढ़ लक्ष्य को गिराने में प्रयुक्त होती है॥ ११४॥

इस प्रकार प्रयोग-भेद से छह मुष्टियों को धनुर्विद्या का ज्ञाता कार्य के समय प्रयोग करे॥ ११५॥

धनुर्मुष्टि का सन्धान—सन्धान (धनुष को पकड़ना) तीन प्रकार का होता है। अधः सन्धान, ऊर्ध्व सन्धान और समसन्धान। इन तीन कार्यों का यथायोग्य उपयोग करें॥ ९०॥

अधःसन्धान का बाण को दूर फेंकने में, सम का लक्ष्यभेदन में और ऊर्ध्वसन्धान का दृढ़ लक्ष्य को भेदने के लिये प्रयोग करे॥ ९१॥

मानसोल्लास में—अङ्गुठे के मूलप्रदेश के पास तर्जनी अङ्गुली से बाण मिला होने पर तथा धनुषमुष्टि और गुणमुष्टि समान हो तो इसे समसन्धान कहते हैं॥ १४७॥

समसन्धान का रथ में प्रयोग करे, भूमि पर स्थित लक्ष्य को वेधने के लिये अधःसन्धान

Scanned by CamScanner

ऊर्ध्व सन्धान

अधः सन्धान

सम सन्धान

Scanned by CamScanner

ऊर्ध्वं दूरस्थिते लक्ष्ये नीचसन्धानसंगतिः। नीचलक्ष्ये तथा चोर्ध्वं समलक्ष्ये समं भवेत्॥ १४९॥

—मानसो० २।१।४

नीतिप्रकाशिकायां धनुषश्चतुर्दश गतयः—

लक्ष्यस्य प्रतिसन्धानमाकर्षणविकर्षणे। पर्याकर्षानुकर्षौ च मण्डलीकरणं तथा॥ १९॥
आसन्नदूरपातौ च पृष्ठमध्यमपातने। एतानि वल्गितान्याहुश्चतुर्दश धनुर्विदः॥ २०॥

—नी०प्र०अ० २०

व्यायः[१]

कैशिकः केशमूले वै शरशृङ्गे च सात्विकः। श्रवणे वत्सकर्णश्च ग्रीवायां भरतो भवेत्॥ ९२॥
अंसके स्कन्धनामा च व्यायाः पञ्च प्रकीर्तिताः।
कैशिकश्चित्रयुद्धेषु ह्यधो लक्ष्येषु सात्विकः। वत्सकर्णः सदा ज्ञेयो भरतो गूढभेदने॥ ९३॥
दृढभेदे च दूरे च स्कन्धनामानमुद्दिशेत्।　　*—वा० ध०*

मानसोल्लासे—

आकृष्टसायकं मुष्टिं कर्णाग्रस्योर्ध्वमङ्गुले। विन्यस्य दर्शयेत् सोऽयं कैशिकं नीचवेधने॥ १२४॥
कर्णाग्रचुम्बितं मुष्टिं कृत्वा सायकपीडनम्। सात्वतं दर्शयेत् सोऽयं पूर्ववन्नीचलक्ष्यके॥ १२५॥
कर्णनाभिसमं मुष्टिं कृत्वा मार्गणगर्भितम्। वार्षगण्यं प्रत्युञ्जीत सोऽयं लक्ष्ये समे नृपः॥ १२६॥

तथा ऊपर स्थित लक्ष्य का ऊर्ध्वसन्धान से भेदन करे॥ १४८॥

ऊँचा और दूर लक्ष्य होने पर नीच सन्धान, नीचा लक्ष्य होने पर ऊर्ध्वसन्धान और समलक्ष्य होने पर समसन्धान का प्रयोग करें॥ १४९॥

नीतिप्रकाशिका में धनुष की चौदह गतियाँ—लक्ष्य के प्रतिसन्धान, आकर्षण, विकर्षण, पर्याकर्षण, अनुकर्षण, मण्डलीकरण, पूरण, स्फारण, धूनन, भ्रामण, आसन्नपात, दूरपात, पृष्ठपात और मध्यपात—ये चौदह गतियाँ धनुष की धनुर्विद्याविशारदों द्वारा कही गयी हैं।

धनुष की प्रत्यञ्चा को खेंचना व्याय कहलाता है। इनमें प्रत्यञ्चा को केशमूल तक खेंचना कैशिक, शिखा तक सात्विक, कान तक वत्सकर्ण, ग्रीवा तक भरत और कन्धे तक खेंचना स्कन्धनामा, ये पाँच व्याय होते हैं॥ ९२½॥

कैशिक व्याय का प्रयोग चित्रयुद्धों में, नीचे के लक्ष्यों में सात्त्विक, गूढभेदन में वत्सकर्ण और भरत तथा दृढ़भेद एवं दूर से वेध करने में स्कन्धनामा व्याय को प्रयुक्त करे॥ ९३½॥

मानसोल्लास में—बाणसहित गुणमुष्टि को खेंचकर कान से भी एक अङ्गुल आगे रखकर राजा नीचे लक्ष्य को भेदने के लिये प्रयुक्त कैशिक व्याय का प्रदर्शन करे॥ १२४॥

कान के अग्रभाग तक शरसहित मुष्टि को लाकर पूर्ववत् नीचे लक्ष्य को वेधने के लिये सात्वत को प्रदर्शित करे॥ १२५॥


कान के छिद्र तक शरसन्धान करके समलक्ष्य के लिये राजा वार्षगण्य (वत्सकर्ण) का प्रयोग करे॥ १२६॥

---

१. प्रत्यञ्चाकर्षणं व्याय उच्यते।

Scanned by CamScanner

व्याय (धनुष की डोरी खींचना)




कैशिक




सात्त्विक



वत्सकर्ण



भरत



स्कन्ध नामा

Scanned by CamScanner

अधस्तात् कर्णरन्ध्रस्य मुष्टिमेकाङ्गुले स्थिरम्। विन्यस्य भरतं सोयं समे लक्ष्ये प्रदर्शयेत्॥ १२७॥
अपरे बाहुशिखरे मुष्टिं कृत्वा समार्गणम्। उच्च दूरे तथा लक्ष्ये छन्दव्यायं प्रदर्शयेत्॥ १२८॥

—मानसो० भा० २ अ० १ विं० ४

जामदग्न्यधनुर्वेदे—
केशान्ताच्चिबुकं यावदन्तरालं दशाङ्गुलम्। स्थानं चैषां विनिर्दिष्टं द्व्यङ्गुलं द्व्यङ्गुलमधः॥
कौशिकं सात्वतं चैव वार्षिघ्नं भारतं तथा। छेदं च पञ्चमं प्रोक्तं ज्ञेयं निन्द्यं यथोत्तरम्॥

—राज० परशुराम पृष्ठ ११९

स्थानम्

१. आलीढम्—
आलीढे तु प्रकर्तव्यं सव्यं चानुकुञ्चितम्। दक्षिणन्तु पुरस्ताद् वा दूरपाते विशिष्यते॥ ७८॥

—वा० ध०

अग्निपुराणे—
हलाकृतिमयं यच्च स्तब्धजानूरुदक्षिणम्। वितस्त्यः पञ्च विस्तारे तदालीढं प्रकीर्तितम्॥

—अ० २४९

वीरचिन्तामणिशार्ङ्गधरयोः—
अग्रतो वामपादं च दक्षिणं जानुकुञ्चितम्। आलीढे तु प्रकर्तव्यं हस्तद्वयसुविस्तरम्॥
विष्णुधर्मोत्तरेऽयमधिकः—
नमिता पूर्वजङ्घा च सदालीढे विधीयते। तिर्यग् गतो भवेद् वामो दक्षिणोऽपि भवेद् ऋजुः॥ ५॥

—वि० ध० व० २ अ० १७९

कान के छिद्र से एक अङ्गुल नीचे मुष्टि को लाकर सम लक्ष्य के लिये भरत नामक व्याय को दिखलाये॥ १२७॥

मुष्टि को शरसहित बाहू शिखर (कन्धे) तक लाकर ऊँचे और दूर स्थित लक्ष्य के लिये छन्दव्याय (स्कन्धनाम) व्याय का प्रदर्शन करे॥ १२८॥

जामदग्न्यधनुर्वेद में—केश (शिखा) से लेकर ठुड्डी तक दश अङ्गुल स्थान है। इस स्थान में दो-दो अङ्गुल नीचे क्रमशः कैशिक, सात्वत, वार्षिघ्न, भारत एवं छेद व्याय का स्थान जानना चाहिये। इन व्यायों में कैशिक उत्तम एवं अन्य क्रमशः निकृष्ट कहे गये हैं॥

पैंतरा आलीढ़ स्थान में—दाहिना पैर आगे करके बाँया पैर पीछे की ओर झुका रहे इसे आलीढ़ स्थान कहते हैं। शर को दूर फैंकने में इससे खड़ा होना चाहिये॥ ७८॥

अग्निपुराण में—दाहिना पैर आगे सीधा करके स्थिर रहे और हल की जैसी आकृति पैरों की एवं अन्तर पाँच वितस्ति रहे, इसे आलीढ़ स्थान कहते हैं।

वीरचिन्तामणि और शार्ङ्गधरधनुर्वेद में—आगे बायाँ पैर और पीछे दाहिना पैर झुका हुआ दो हाथ के अन्तर पर आलीढ़ स्थान में करना चाहिये॥

विष्णुधर्मोत्तर में अग्निपुराण से इतना अधिक है—पूर्वजङ्घा (बाँया पैर) झुका हुआ रहे तो इसे आलीढ़ कहते हैं। इसमें बाँया पैर तिरछा एवं दाहिना सीधा रहता है।

Scanned by CamScanner


स्थान (पवित्रा)



प्रत्यालीढ




आलीढ




विशाख



समपाद



असमपाद



दर्दुरक्रम



गरुडक्रम



पद्मासन

Scanned by CamScanner

मानसोल्लासे—

पूर्वमाकुञ्चितं पादं चापस्थानाङ्गयोजितम्॥ ९७॥
तिर्यक् प्रसारितं कृत्वा पृष्ठेपादं तथाऽपरम्। अङ्गुष्ठः पूर्वपादस्य पश्चात्पादकनिष्ठिका॥ ९८॥
वितस्तिपञ्चकं मध्यं तयोरालीढकं भवेत्।

आकाशभैरवतन्त्रे—

विन्यस्याग्रे वामपादं पश्चादाकुञ्च्य दक्षिणम्॥ १३॥
आलीढं प्रकर्तव्यं समीपशरपातने॥ १४॥ —*पटल १३६*

२. प्रत्यालीढम्—

अग्रतो वामपादश्च दक्षिणं चानुकुञ्चितम्। प्रत्यालीढं प्रकर्त्तव्यं हस्तद्वयसविस्तरम्॥ ७७॥

—*वा० ध०*

वीरचिन्तामणौ—

प्रत्यालीढे तु कर्त्तव्यं सव्यं चैवानुकुञ्चितम्। दक्षिणं तु पुरस्तद्वद् दूरपाते प्रशस्यते॥

आकाशभैरवतन्त्रे—

प्रत्यालीढे प्रकर्त्तव्यं दक्षिणं पुरतः पदम्॥ १४॥
वामं त्वाकुञ्चितं कार्यं सुदूरशरपातने। —*आकाश भै० पटल १३६*

३. विशाखस्थानम्—

पादौ सविस्तरौ कार्यौ समौ हस्तप्रमाणतः। विशाखस्थानकं ज्ञेयं कूटलक्ष्यस्य वेधने॥ ७९॥

—*वा० ध०*

मानसोल्लासे—पहला मुड़ा हुआ (बायाँ) पैर जोकि धनुष से लगा हुआ है तिरछा (पीछे की ओर) करके दूसरे पैर को सीधा कर आगे के पैर से पीछे के पैर की कनिष्ठा अङ्गुली तक पाँच वितस्ति का अन्तर रहे, इसे आलीढ़ कहते हैं।

आकाशभैरवतन्त्र में—बायाँ पैर आगे और पीछे दाहिने पैर को मोड़ें। इसे आलीढ-स्थान कहते हैं। इसका उपयोग निकट लक्ष्य के लिये होता है।

२. प्रत्यालीढ स्थान—आगे बायाँ पैर और पीछे दाहिना पैर झुकाकर दो हाथ का पैरों में अन्तर रहे, ऐसी स्थिति प्रत्यालीढ कहलाती है॥ ७७॥

वीरचिन्तामणि में—प्रत्यालीढ स्थान में स्थित होने के लिये बायाँ पैर झुका हुआ और दाहिना पैर आगे सीधा करना चाहिये। इससे दूर लक्ष्य का वेधन करते हैं।

आकाशभैरवतन्त्र में—प्रत्यालीढ में दाहिना पैर आगे करना चाहिये। बायाँ पैर झुका हुआ रहेगा। इसे दूर का निशाना मारने में प्रयोग करना चाहिये॥ १४॥

विशाखस्थान—दोनों पैर एक हाथ के अन्तर पर सीधे रहें, इसे विशाखस्थान जानना चाहिये। इससे कूटलक्ष्य का वेधन किया जाता है॥ ७९॥

Scanned by CamScanner

अग्निपुराणे—

बाह्याङ्गुलिस्थितौ पादौ स्तब्धजानुबलावुभौ। त्रिवितस्त्यन्तरा स्थानमेतद्वैशाखमुच्यते॥

—*अ० पु० अ०*

आकाशभैरवतन्त्रे—

पादौ सविस्तरौ कृत्वा समौ हस्तप्रमाणतः॥ १५॥
विशाखस्थानकं कार्यं कूटलक्ष्यविभेदने।

—*आ० भै० प० १३६*

४. समपादस्थानम्—

समपादे समौ पादौ निष्कम्पौ च सुसङ्गतौ॥ ८०॥

—*वा० ध०*

विष्णुधर्मोत्तरे—

पार्ष्णिपादतले पृष्ठं सर्वे स्युः संहिता यदि। दृष्टं सामपदं स्थानमेतल्लक्षणस्तथा॥

—*वि० ध० ख० २ अ० १७९*

अग्निपुराणे—

अङ्गुष्ठगुल्फपार्ष्ण्यङ्घ्रिः श्लिष्टाः स्युः सहिता यदि। दृष्टं समपदं स्थानमेतल्लक्षणस्तथा॥

—*अ० २४९*

मानसोल्लासे—

वितस्त्यन्तरमात्रौ तु समौ पादौ प्रयोजयेत्॥ १००॥
पूर्ववत् पादसंस्थानं समपादं प्रदर्शयेत्।

५. असमपादस्थानम्—

असमे च पुरो वामे हस्तमात्रणतं वपुः॥ ८०॥

—*वा० ध०*

अग्निपुराण में—पैरों की अङ्गुलियाँ बाहर की ओर रहें, ऐसी स्थिति में दोनों पैर तीन वितस्ति (डेढ हाथ) के अन्तर पर सीधे खड़े रहें, इसे वैशाखस्थान कहते हैं।

आकाशभैरवतन्त्र में—दोनों पैर एक हाथ प्रमाण फैलाकर विशाखस्थान की स्थिति बनानी चाहिये। यह कूट (छिपा हुआ, गुप्त) लक्ष्य को भेदने में प्रयुक्त होता है।

समपाद—समपादस्थान में दोनों पैर मिले हुए बिना हिलाये रहते हैं॥ ८०॥

विष्णुधर्मोत्तर में—अङ्गूठे, पैरों के तलवे (पञ्जे) और पृष्ठभाग यदि सब मिले हुए हों तो इन लक्षणों से युक्त सामपद स्थान होता है।

अग्निपुराण में—अङ्गूठे, टखने, जंघायें यदि सब परस्पर मिले हुए हों तो यह समपद स्थान का लक्षण है।

मानसोल्लास में—एक वितस्ति अन्तर पर पूर्ववत् (वैशाखवत्) पैरों को रखकर समपाद स्थान का प्रदर्शन करे॥ १००½॥

असमपाद—असमपाद में पैरों का अन्तर एक हाथ और बायाँ पैर आगे तथा शरीर आगे की ओर झुका हुआ रहता है॥ ८०॥

Scanned by CamScanner

६. दर्दुरक्रमस्थानम्—

आकुञ्चितोरू द्वौ यत्र जानुभ्यां धरणीं गतौ। दर्दुरक्रममित्याहुः स्थानकं दृढभेदने॥ ८१॥

—वा० ध०

मानसोल्लासे—

बाह्यौ तौ वलितौ पादौ जानुनी च भुवि स्थिते॥ १०४॥
आसनं दार्दुरं कृत्वा प्रौढिं प्रकटयेन्नृपः। *—मानसो० भा० २ अ० १ वि० ४*

आकाशभैरवे—

वपुराकुञ्च्यं चारु द्वौ जानुनी धरणीं गते। कृत्वा कार्यं दर्दुराख्यं स्थानं कण्टकभेदने॥ १७॥

—पटल १३६

७. गरुडक्रमम्—

सव्यं जानुगतं भूमौ दक्षिणं च सकुंचितम्। अग्रतो यत्र दातव्यं तं विद्याद्गरुडक्रमम्॥ ८२॥

—वा० ध०

मानसोल्लासे—

वामं जानु क्षितौ कृत्वा दक्षिणं पादमुत्कटम्।
गरुडस्यासने स्थित्वा गरुडान्सायकान्क्षिपेत्॥ १०६॥ *—मानसो० भा० २ अ० १ वि० ४*

८. पद्मासनम्—

पद्मासनं प्रसिद्धं तु ह्युपविश्य यथाक्रमम्। धन्विनां तत्तु विज्ञेयं स्थानकं शुभलक्षणम्॥ ८३॥

—वा० ध०

मानसोल्लासे—

अधः पादतले कृत्वा पद्मासनमथाचरेत्॥ १०५॥

दर्दुरक्रमस्थान में—दोनों उरु (जाँघ) मोड़कर दोनों घुटनों को भूमि पर टिकाकर बैठना दर्दुरक्रमस्थान कहलाता है। इससे दृढ़ लक्ष्य का भेदन किया जाता है॥ ८१॥

मानसोल्लास में—पैरों को बाहर की ओर मोड़कर दोनों घुटने भूमि पर टिकाकर दार्दुर आसन की स्थिति बनाकर राजा अपना नैपुण्य प्रकट करे।

आकाशभैरवे—शरीर को झुकाकर और जाँघों को मोड़कर दोनों घुटने भूमि पर टिकाये। इस दर्दुर नामक स्थान से स्थित होकर कण्टक (कूट) लक्ष्य का भेदन किया जाता है॥ १७॥


गरुडक्रमम्—बायें पैर का घुटना भूमि पर टिका हुआ और दाहिना पैर मुड़ा हुआ आगे रहेगा, इसे गरुडक्रमस्थान कहते हैं॥ ८२॥

मानसोल्लास में—बायें घुटने को भूमि पर टिकाकर दाहिने को उत्कट आसन की भाँति (आधा मोड़कर) करके गरुडासन में स्थित होकर गरुडसायकों (बाणविशेष) को फैंके॥ १०६॥

पद्मासनम्—बैठकर पैर के ऊपर पैर रखकर स्थित होना नामवाला पद्मासन तो प्रसिद्ध है ही। यह धनुषधारियों के लिये शुभ आसन है॥ ८३॥

मानसोल्लास में—नीचे पैरों को स्थित (एक दूसरे के ऊपर) करके पद्मासन करे॥ १०५॥


Scanned by CamScanner



मण्डल



जात



हंसपाद



स्वस्तिक दर्दुर



संपुट

Scanned by CamScanner

९. मण्डलम्—

चतुर्वितस्तिकं मध्यं तिर्यक् पादावुभावपि॥ १०१॥
अस्त्रादिवाहने शस्तं मण्डलं स्थानकं विदुः। —*मानसो० २ अ० १ वि० ४*

अग्निपुराणे—

हंसपंक्त्याकृतिसमे दृष्येते यत्र जानुनी। चतुर्वितस्ति विच्छिन्ने तदेतन्मण्डलं स्मृतम्॥ १०१॥
—*अ० २४९*

वैजयन्तीकोशे—

त्रिवितस्त्यन्तरौ पादौ मण्डलं तोरणाकृतिः। —*पृष्ठ ८६ क्षत्रियाध्यायः*

१०. जातम्—

पूर्वाङ्घ्रिपार्ष्णेरारभ्य पाश्चात्याङ्गुष्ठकावधि॥ १०२॥
वितस्तिमात्रं मध्यं चेज्जातं स्थानं प्रदर्शयेत्। जातस्य वैपरीत्येनाभिजातं नियोजयेत्॥ १०३॥
—*मानसो०*

अग्निपुराणे—

गुल्फौ पार्ष्णिग्रहौ चैव स्थितौ पञ्चाङ्गुलान्तरौ। स्थानं जातं भवेदेतद् द्वादशाङ्गुलमायतम्॥ १४॥
—*अग्नि० अ० २४९*

११. हंसपादस्थानम्—

पाश्चात्याङ्घ्रि समुत्क्षिप्य हंसपादं प्रकाशयेत्॥ १०४॥ —*मानसो० पृष्ठ-१६३*

मण्डलस्थान—दोनों पैरों में अन्तर चार वितस्ति एवं दोनों पैर बाहर को तिरछे रहें तो इसे मण्डलस्थान कहते हैं। अस्त्रादि एवं वाहन (घोड़ादि) में यह स्थान उपयुक्त जानना चाहिये॥ १०१½॥

अग्निपुराण में—दोनों घुटने हंस की पंक्ति के सदृश एवं चार वितस्ति के अन्तर पर स्थित हों तो यह मण्डलस्थान कहा गया है॥ १०१॥

वैजयन्तीकोश में—तीन वितस्ति के अन्तर पर दोनों पैर तोरण (द्वार) की आकृति में हों तो मण्डलस्थान होता है।

जातम्—पूर्व (आगे रखे हुए, बायें) पैर की एड़ी से लेकर पीछे के पैर (दाहिने) के अङ्गूठे तक यदि एक वितस्ति का अन्तर हो तो उसे जातस्थान कहते हैं। इसी प्रकार पैरों को बदलकर रखने से अभिजात स्थान होता है॥ १०२-१०३॥

अग्निपुराण में—दोनों पैरों के टखने और एड़ियाँ ५ अङ्गुल के अन्तर से स्थित हों और पैरों का अन्तर बारह अङ्गुल (१ वितस्ति) हो तो यह जातस्थान होता है॥ १४॥

हंसपाद—पूर्व (जात) स्थान से ही पीछे के पैर को ऊपर (हंस की भाँति) उठाकर हंसपाद स्थान को दिखाये॥ १०४॥

Scanned by CamScanner

१२. स्वस्तिकदर्दुरस्थानम्—

दक्षिणं स्वस्तिकाकारं वामं दर्दुरवत्पदम्। आसनं मृगया योग्यं कुर्यात्स्वस्तिकदर्दुरम्॥ १०७॥
आपीड्य भूमिं जानुभ्यामासनं जानुपीडनम्। अनुत्तानेऽथवोत्ताने शयने शयनासनम्॥ १०८॥

—मानसो० पृ० १६३

विकटम्

१३. अग्निपुराणे—

ऋजुजानुर्भवेद्वामो दक्षिणः सुप्रसारितः। अथवा दक्षिणं जानुं कुब्जं भवति निश्चितम्॥ १५॥
दण्डायतो भवेदेषः चरणः सह जानुना। एवं विकटमुद्दिष्टं द्विहस्तान्तरमायतम्॥ १६॥

विष्णुधर्मोत्तरे—

कुब्जजानुर्भवेद् वामो दक्षिणस्तु प्रसारितः॥ ७॥
अथवा दक्षिणं जानुः कुब्जं भवति निश्चलम्। भवेद्दण्डायतो वामश्चरणः सह जानुना॥ ८॥
एवं विकच्छमुद्दिष्टं[2] द्विहस्तान्तरमायतम्[1]। *—वि० ध० खण्ड २, अ० १७९*

सम्पुटम्

१४. अग्निपुराणे—

जानुनी द्विगुणे स्यातामुत्तानौ चरणावुभौ। अनेन विधियोगेन सम्पुटं परिकीर्तितम्॥ १७॥

—अग्नि पुराण, अ० २४९

स्वस्तिकदर्दुर—दायाँ पैर स्वस्तिक की भाँति और बायाँ दर्दुर के समान करके शिकार के लिये उपयुक्त स्वस्तिक दर्दुरस्थान को दिखलाये॥ १०७॥

जानुपीडनम्—घुटनों से भूमि को पीड़ित करके जानुपीडन आसन को करे।

शयनासन—औंधे या सीधे लेटकर शयनासन स्थान बनता है।

विकटस्थान—बायाँ घुटना सीधा और दाहिना फैला हुआ, अथवा दाहिना पैर झुका हुआ स्थिर रहे तो यह दण्डायत के सदृश दो हाथ पैरों के अन्तरयुक्त विकट नामवाला स्थान कहा गया है॥ १५-१६॥

विष्णुधर्मोत्तर में—बायाँ घुटना मुड़ा हुआ और दाहिना पैर फैला हुआ अथवा दाहिना घुटना झुका हुआ एवं बायाँ पैर दण्ड के सदृश दो हाथ के अन्तर पर रहे तो इसे विकच्छस्थान कहते हैं।


अग्निपुराण में—सम्पुट—घुटनों को मोड़कर बज्रासन की भाँति बैठना सम्पुट-स्थान कहलाता है॥ १७॥

---

१. विष्णुधर्मोत्तरस्यैव स्पष्टः पाठः।
२. आलीढप्रत्यालीढयोरेव वर्णनमत्र प्रतिभाति।

Scanned by CamScanner

गुप्तकालीन स्वर्णमुद्राओं में प्रदर्शित स्थान (पवित्रे)



आलीढ़



प्रत्यालीढ़



असमपाद　　मण्डल　　जात

Scanned by CamScanner

पञ्चम अध्याय

इस अध्याय में धनुष-बाण का अन्तिम उद्देश्य लक्ष्यसन्धान (निशाना मारना) के अनेक भेद-प्रभेदों का कथन किया है। चार प्रकार के लक्ष्य—चल, अचल, चलाचल और द्वयचल होते हैं। साठ धनुष की दूरी पर लक्ष्यसन्धान ज्येष्ठ, चालीस का मध्य और बीस का कनिष्ठ कहलाता है। लक्ष्य-भेदन के लिए पुरुष जितना ऊँचा सोलह अङ्गुल प्रमाण का गोलाकार लक्ष्य बनाना चाहिये। इसके मध्य में दो अङ्गुल का दूसरा गोला होता है। इसे सूक्ष्म लक्ष्य कहते हैं। शरों की उन्मुखी इत्यादि दश गतियाँ होती हैं। इसी प्रकार सूचीमुखी, मीनपुच्छा, भ्रमरी ये तीन हीन गतियाँ होती हैं। इनमें बाण सीधा न जाकर, ऊपर, नीचे, दाहिने, बायें या तिरछा जाता है। ऊर्ध्वसन्धान, अधः सन्धान एवं समसन्धान तीन भेद सन्धान के कहे हैं।

विभिन्न प्रकार के बाण एवं गुणमुष्टि, धनुर्मुष्टि, व्याय तथा स्थानों के प्रयोग से दृढ़ लक्ष्यवेध, चल लक्ष्यवेध, स्थिर लक्ष्यवेध, चित्र लक्ष्यवेध तथा शब्दवेध इत्यादि का वेधन करने की अनेक विधियों का दिग्दर्शन इस अध्याय में किया है।

सर्वप्रथम विष्णुधर्मोत्तर का पाठ पुरातन होने से उद्धृत किया है। अग्निपुराण का पाठ उससे मिलता है। नीचे फुटनोट में पाठ भेद भी दे दिया है। अन्य शास्त्रों में वर्णित विधियों को भी विषय के स्पष्टिकरण के लिये संकलित किया है।

लक्ष्यसन्धानम्

विष्णुधर्मोत्तरे—खण्ड २ अध्याय १७९ (अग्निपुराणे अ० २४९)

कार्मुकं भृगुवामेन[1] वामं[2] दक्षिणकेन वा। वैशाखेप्यथ वा जाते स्थितो[3] वाप्यथवायते[4] ॥ १२ ॥
गुणाग्रं[5] तु ततः कृत्वा कार्मुके प्रियकार्मुकः। अधः कोटिं[6] तु धनुषः फलदेशे[7] च पत्रिणः ॥ १३ ॥
धरण्यां स्थापयित्वा तु लालयित्वा तथैव च। भुजाभ्यामत्र कुब्जाभ्यां प्रकोष्ठाभ्यामरिंदम ॥ १४ ॥
न्यस्य बाणं धनुः श्रेष्ठं पुङ्खदेशे च पत्रिणः। विन्यासो धनुषश्चैव द्वादशाङ्गुलमन्तरः ॥ १५ ॥
तयोर्भार्गव[8] कर्त्तव्यो नातो हीनो न चाधिकः। निवेश्य कार्मुकं कण्ठे[9] नितम्बे शरसङ्गरम् ॥ १६ ॥
उत्क्षिपेदस्थिरं[10] हस्तमन्तरेणाक्षिकर्णयोः। पूर्वेण मुष्टिना ग्राह्यः स्तनाग्रं[11] दक्षिणः शरः ॥ १७ ॥

विष्णुधर्मोत्तर में—हे ब्रह्मन्! योद्धा को चाहिये कि बायें हाथ में धनुष और दाहिने में बाण लेकर वैशाख या जात अथवा आयत स्थान में स्थिर होकर ॥ १२ ॥ धनुष पर प्रत्यञ्चा चढ़ाकर धनुष का नीचेवाला सिरा और बाण का फल भी भूमि पर टिकाकर उसे मुड़ी हुई भुजाओं और प्रकोष्ठ (पहुँचे) से ऊपर उठाकर बाण को धनुष पर चढ़ावे। धनुष एवं प्रत्यञ्चा का (चढ़ाने पर) अन्तर १२ अङ्गुल होना चाहिये। न इससे कम और न ही अधिक ॥ १३-१४-१५½ ॥

तथा उस अवस्था में बाण फेंके। धनुष को कण्ठ के समीप लाकर एवं पीठ पर तरकस

अग्निपुराणे पाठभेदाः—

१. गृह्य २. बाण ३. आयतौ ४. स्थितौ ५. गुणातन्तुं ६. कटिन्तु ७. फलदेशन्तु ८. ज्यया विशिष्टं ९. नाभ्यां १०. उत्थित ११. स्तनाग्रे दक्षिणे।

Scanned by CamScanner

हरणं तु ततः कृत्वा शीघ्रं पूर्वा[1] प्रसारयेत्। नात्यन्तरा नैव बाह्या नोर्ध्वगा नाऽधरास्तथा॥ १८॥
न च कुब्जा न चोत्ताना न चला नातिवेष्टिता। समा स्थैर्यगुणोपेता पूर्वे दण्डमिव स्थिता॥ १९॥
छादयित्वा ततो लक्ष्यं पूर्वेणानेन मुष्टिना। [2]तरसा तूत्थितो यत्नात्त्रिकोणविनतिस्थितः॥ २०॥
स्रस्तांशो निश्चलग्रीवो मयूरांचितमस्तकः। ललाटनासावक्त्रांसः [3]कूर्परश्च समं भवेत्॥ २१॥
अन्तरं [4]त्वङ्गुलं ज्ञेयं चिबुकस्यांसकस्य च। प्रथमे त्र्यङ्गुले विन्द्याद् द्वितीये द्व्याङ्गुलं स्मृतम्॥ २२॥
तृतीयेऽङ्गुलमुदिष्टं चायतं चिबुकांसयोः। गृहीत्वा सायकं तत्र[5] तर्जन्यङ्गुष्ठमेव च॥ २३॥
अनामया ततो गृह्य पुनर्मध्यमयापि च। तावदाकर्षयेद् योगाद् यावद् बाणः सुपूरितः॥ २४॥
एवं विधमुपक्रम्य मोक्तव्यो विधिवत् खगः। दृष्टि मुष्टिहतं लक्ष्यं भिन्द्याद् बाणेन भार्गव॥ २५॥
मुक्त्वा चापं[6] वाम हस्तं क्षिपेत् वेगेन पृच्छतः[7]। एतदुच्छेदमिच्छन्ति ज्ञातव्यं हि त्वया द्विज॥ २६॥

बाँधकर दाहिने ऊपर उठे हुए हाथ को आँख एवं कान के मध्य में स्थिर करे। पहले बाण मुट्ठी में पकड़े और उसे दाहिने स्तन की सीध में कर ले। उसके पश्चात् बाण को प्रत्यञ्चा पर चढ़ाकर उसे खेंचे॥ १६-१७½॥

धनुष की डोरी न धनुष से बाहर गई हुई हो, न भीतर, न ऊपर, न नीचे, न तिरछी, न उत्तान, न हिलती हुई और न ही बहुत अधिक बटी हुई हो अपितु सभी स्थानों में सम, सुदृढ़, दण्ड के समान सीधी होनी चाहिये॥ १८-१९॥

प्रत्यञ्चा चढ़ाने के पश्चात् पूर्व कही हुई मुष्टि के अनुसार लक्ष्य को मुष्टि से ढककर यत्नपूर्वक अपनी छाती ऊपर की ओर उठाकर शरीर को तिरछी अवस्था में रखना चाहिये॥ २०॥

इस स्थिति में कन्धा ढीला, ग्रीवा निश्चल और मस्तक मोर के सदृश (सामने) रहेगा। ललाट, नाक, मुख, कन्धा और कोहनी सभी सम स्थिति में रहेंगे॥ २१॥ ठोड़ी और कन्धे का अन्तर तीन अङ्गुल रहेगा। पहली बार यह अन्तर ३ अङ्गुल दूसरी बार २ अङ्गुल और तीसरी बार ठुड्डी और कन्धे का अन्तर १ अङ्गुल रहता है॥ २२½॥

बाण को पंख की ओर से तर्जनी और अङ्गूठे से पकड़ें। उसके पश्चात् अनामिका और पश्चात् मध्यमा अङ्गुली से भी पकड़ें। बाण को तब तक खींचे जबतक पूरा धनुष पर न आ-जाये॥ २३-२४॥

इस विधि से धनुष पर बाण चढ़ाकर छोड़ना चाहिये॥ ½॥ हे भार्गव! जब लक्ष्य (निशाना) दृष्टि और मुष्टि से ढक लिया जाये तब लक्ष्य का भेदन करे॥ २५॥

बाण छोड़ने के पश्चात् तुरन्त ही बायें हाथ को धनुषसहित पीछे की ओर को बलपूर्वक फेंके, क्योंकि शत्रु इसी हाथ को काटना चाहते हैं। हे द्विज! यह बात तुम्हें अवश्य जान लेनी चाहिये॥ २६॥

---

१. पूर्वं।
२. उरसा तूत्थितो यन्ता त्रिकोणविनतस्थितः।
३. ललाटनासावक्त्रांशाः कर्पुरश्चसमं भवेत्।
४. त्र्यङ्गुलं ५. पुङ्खात्। ६. मुक्त्वा तु पश्चिमं हस्तं। ७. पृष्ठतः।

Scanned by CamScanner

कर्पूरं[1] त्रिविधं कार्यमाकृष्टन्तु धनुष्मता। [2]तत्रापि मुक्तके कार्यमक्षश्लिष्टस्तु मध्यमम्॥ २७॥ [3]ज्येष्ठं प्रकृष्टं विज्ञेयं धनुःशास्त्रविशारदः। ज्येष्ठस्तु पावको[4] ज्ञेयो भवेद् द्वादशमुष्टयः॥ २८॥ एकादश तथा साध्यः कनीयान् दशमुष्टयः।

विष्णुधर्मोत्तरे—खण्ड २ अध्याय १८०

[5]पूर्णायुधो भृतिं कृत्वा ततो मांसैर्गतायुषाम्। [6]वराहमृगमेषाणां महिषाद्यैस्तथा द्विज॥ १॥ [7]मुनिधौतं ततः कुर्याद् युग्यं भूपैर्विधानवित्। मृदुसंस्तरणोपेतं मृदु वल्गु च योजयेत्॥ २॥ ततो वाहं[8] समारुह्य दंशितः सुसमाहितः। [9]तूर्णमारुह्य बध्नीयाद् द्रढां कक्षां च दक्षिणाम्॥ ३॥ [10]वैकक्ष्यमपि तच्चापं धारयेद् यन्त्रसंस्थितम्। ततो समुद्धरेत बाणं[11] ऋणाद् दक्षिणपाणिना॥ ४॥ [12]तज्जवः सहितं सर्वं मध्ये संगृह्य धारयेत्। वामहस्तेन वैकक्ष्याद् धनुस्तस्मात् समुद्धरेत्॥ ५॥ [13]सुनिषण्णमणिर्भूत्वा गुणे पुङ्खं निवेशयेत्। संपीड्य सिंहकर्णेन पुंखेनापि समे दृढम्॥ ६॥ वामकर्णोपरिस्थं च फलं वामस्य धारणात्[14]। बलामध्यमया[15] तत्र वामाङ्गुल्या च धारयेत्॥ ७॥

धनुष खेंचते समय कोहनी को नीचे करले। बाण छोड़कर कोहनी को आँख से सटा लें। यह मध्यम श्रेणी का बचाव है और शत्रु के लक्ष्य से दूर रखना यह उत्तम है॥ २७½॥ उत्तम श्रेणी का बाण बारह मुष्टि (६० अङ्गुल) मध्यम बाण ग्यारह मुष्टि, (५५ अङ्गुल) और कनिष्ठ बाण दश मुष्टि (५० अङ्गुल) का होता है॥ २८½॥

विष्णुधर्मोत्तर में—पूर्ण आयुधों से युक्त होकर पूर्ण श्रम करके वराह, मृग, मेष, महिष आदि पशुओं के मांस से तर्पणादि क्रिया अन्य नृपों के साथ करें। (अग्निपुराण) ब्रह्मन्! द्विज को चाहिये पूरी लम्बाईवाले धनुष का निर्माण कराकर उसे अच्छी प्रकार धो-पोंछकर यज्ञभूमि में स्थापित करें तथा गदा आदि आयुधों को भली-भाँति साफ करे। तत्पश्चात् सुकोमल तीरों से भरा तरकस बाँधे। इसमें विलक्ष्य बाण भी सुरक्षित रहता है। तूणीर को पीठ की ओर दाहिनी काँख के पास दृढ़ता से बाँधे॥ १-२-३॥

उसके पश्चात् दाहिने हाथ से तूणीर से तीर निकाले और शीघ्रता से बायें हाथ से धनुष को मध्य में से पकड़कर उठाये। चित्त में विषाद न आने दे। उत्साहयुक्त होकर प्रत्यञ्चा पर बाण को चढ़ाकर सिंहकर्ण मुष्टि से पंखसहित डोरी को दबाकर समभाव से सन्धान करें॥ ६॥

यदि बायें हाथ से बाण को चलाना हो तो बायें हाथ में बाण ले और दाहिने हाथ से धनुष की मुठ्ठी पकड़े। फिर प्रत्यञ्चा पर बाण को इस तरह रखे कि खींचने पर उसका फल या पुङ्ख बायें कान के समीप आ जाये उस समय बाण को बायें हाथ की (तर्जनी और अङ्गुष्ठ के अतिरिक्त) मध्यमा अङ्गुली से भी धारण किये रहे। बाण चलाने की विधि को जाननेवाला पुरुष उपर्युक्त मुष्टि के द्वारा धनुष को दृढ़तापूर्वक पकड़कर मन को दृष्टि के साथ ही लक्ष्यगत करके बाण को शरीर के दाहिने भाग की ओर रखते हुए लक्ष्य की ओर छोड़े।

---

१. कूर्परं तदधः कार्यमाकृष्टं तु धनुष्मता। २. ऊर्ध्वं विमुक्तके कार्यं लक्ष्य। ३. श्रेष्ठं। ४. सायको मध्य। ५. पूर्णायुधं द्विजः कृत्वा ततो मांसैर्गदायुधान्। ६-९. वराह.....इति विष्णुधर्मोतरेऽधिकम् सुनिर्धौतं धनुः कृत्वा यज्ञभूमौ विधापयेत्। मृदुसं स्तरोपेतमिति विष्णुधर्मोतरेऽधिकम् ततो बाणं समागृह्यं तूणमासाद्य। १०. विलक्ष्यमपि तत् बाणं तत्र चैव सुस्थितम्। ११. तूर्णाद्। १२. तेनैव। सर्वस्थाने शरीरमिति मध्यादनन्तरं पठितम्। १३. अविषण्ण। १४. धारयेत्। १५. वर्णान्।

Scanned by CamScanner

मनोलक्ष्यगतं कृत्वा दृष्टिं[1] च सुविधानवित्। [2]दक्षिणे गात्रभागे तु बलामाशु विमोक्षयेत्॥ ८॥
ललाटपुटसंस्थानं दाणीं[3] लक्ष्ये निवेशयेत्॥ ९॥
आकृष्य ताड्येत्तत्र दण्डकं[4] षोडशाङ्गुलम्। मुक्त्वा बाणं ततः [5]पश्चाद्बलां शिक्षेत्तदा तदा॥ १०॥
विगृह्णीयात् मध्यमया ततोऽङ्गुल्या पुनः पुनः। अभिलक्ष्याक्षिपेत् [6]तूणांश्चतुरस्रं च दक्षिणम्॥ ११॥
चतुरस्रगतं [7]वैध्यमभ्यसेदादितः स्थितः। तस्मादनन्तरं तीक्ष्णं परावृत्तगतं[8] च यत्॥ १२॥
[9]निश्रमुन्नतवेद्यन्तमभ्यसेत् तुष्यकं ततः। वेध्यस्थानैष्वथैतेषु सन्यस्तपुटकं धनुः॥ १३॥
[10]हस्तावापगतैः स्त्रस्तैर्जयेद् हस्तकरैरपि। तस्मिन् वेध्यगते राम द्वे वेध्ये दृढसंज्ञिते॥ १४॥
द्वे वेध्ये पुष्करे[11] विद्धि द्वे तथा चित्रपुष्करे। [12]चतुरस्रं स्थूलतीक्ष्णं च दृढवेध्ये प्रकीर्तिते॥ १५॥
[13]चतुरस्रस्थूलतीक्ष्णं.....(त्रुटितपाठः).....। निम्नं पुष्करमुद्दिष्टिं वेध्यमूर्ध्वगतं च यत्॥ १६॥
पुष्करेऽधमवेध्ये तु चित्रपुष्करसंज्ञके। एवं वेध्यगणं कृत्वा दक्षिणेनेतरेण च॥ १७॥
आरोहेत् प्रथमं धीरो जितलक्ष्यस्ततो नरः। एष एव विधिप्रोक्तस्तत्र दृष्टः प्रयोक्तृभिः॥ १८॥

धनुष का दण्ड इतना बड़ा हो कि भूमि पर खड़ा करने पर उसकी ऊँचाई ललाट तक आ जाये उसपर लक्ष्य वेध के लिये १६ अङ्गुल लम्बे चन्द्रक (चाँदमारी) पर सन्धान करे और उसे भली-भाँति खींचकर लक्ष्य पर प्रहार करे। इस तरह एक बाण का प्रहार करके फिर तत्काल ही तूणीर से अङ्गुष्ठ एवं तर्जनी अङ्गुली द्वारा बार-बार बाण निकाले। उसे मध्यमा अङ्गुली से भी दबाकर काबू में करे और शीघ्र ही दृष्टिगत लक्ष्य की ओर चलावे। चारों ओर तथा दक्षिण की ओर लक्ष्यवेध का क्रम जारी रखे। योद्धा पहले से ही चारों ओर बाण मारकर सब ओर के लक्ष्य को वेधने का प्रयास करे॥ ८-१०॥

तदनन्तर वह तीक्ष्ण, परावृत्त (घूमते हुए), निम्न, उन्नत तथा क्षिप्र वेध का अभ्यास बढ़ावे। वेध्य लक्ष्य के ये जो उपर्युक्त स्थान हैं, इनमें सत्त्व (बल एवं धैर्य) का पुट होते हुए विचित्र एवं दुस्तर रीति से सैकड़ों बार हाथों से बाणों के निकालने एवं छोड़ने की क्रिया द्वारा धनुष का तर्जन करे, उसपर टङ्कार दे॥ ११-१२॥

विप्रवर! उक्त वेध्य के अनेक भेद हैं। पहले जो दृढ़, दुष्कर तथा चित्रदुष्कर ये वेध्य के तीन भेद हैं। ये तीनों ही भेद दो-दो प्रकार के होते हैं। दुष्करवेध्य के भी निम्न और ऊर्ध्वगत ये दो भेद कहे गये हैं तथा चित्रदुष्कर वेध्य के मस्तक और मध्य ये दो भेद माने गये हैं॥ १३-१४॥

इस प्रकार इन वेध्यगणों को सिद्ध करके वीर पुरुष पहले दायें अथवा बायें पार्श्व से शत्रु-सेना पर चढ़ाई करे। इससे मनुष्य को अपने लक्ष्य पर विजय प्राप्त होती है। प्रयोक्ता पुरुषों ने वेध्य के विषय में यही विधी देखी और बताई है।

योद्धा के लिये उस वेध्य की अपेक्षा भ्रमण को अधिक उत्तम बताया गया है। वह लक्ष्य

---

१. मुष्टिना च विधानवित्। २. दक्षिणे गात्रभागे तु कृत्वा वर्णं विमोक्षयेत्। ३. दण्डं। ४. चन्द्रकं। ५. उलूका शिक्षस्तदा तथा। ६. क्षिपेत् तूणात्। ७. वेध्यं परावृत्तं गतं च यद्। ८. निम्नमुन्नतवेधञ्च अभ्यसेत् क्षिप्रकन्ततः। ९. वेध्यस्थानेष्वेतेषु सत्वस्य पुटकाद् धनुः। १०. हस्तावापशतैश्चित्रैस्तर्जयेद् दुस्तरैरपि। ११. दुष्करे। १२. न तु निम्नञ्च तीक्ष्णं च दृढवेध्यः प्रकीर्तितः। १३. चतुरस्त्रभिरित्यधिकं विष्णुधर्मोत्तरे। १४. दुष्करं। १५. मस्तका न मध्ये तु चित्रदुष्करं संज्ञके।

Scanned by CamScanner

[1]आदिकं भ्रमणं तस्य तस्माद् विद्वन्प्रकीर्तितम्। [2]लक्ष्यं संयोजयेत्तत्र प्रति यन्त्रगतं दृढम्॥ १९॥
[3]भ्रान्तं प्रचलितं चैव स्थितं यच्च भवेदिति। समन्ताच्छादयेत् पश्चात् छेदयेच्छ्लथयेदपि॥ २०॥
कर्मयोगविधानज्ञो ज्ञात्वेवं विधिमाचरेत्। मनसा चक्षुषा दृष्ट्या [4]योगे शिक्षन्न्यसंजयेत्॥ २१॥
दत्वा प्रयुक्तं सुकृतं प्रमाणान्न्यसेत् समन्तात् पुटकान्विचित्रान्।
अप्यङ्गुलीयप्रतिमां जपेच्च बालङ्गताः काष्ठगतं प्रलम्बम्॥ २२॥
सिद्धार्थकान्गुञ्जयवांश्च तस्मिन् न्यसेद् विधिज्ञो भ्रमरीरिकाञ्च।
मृत्पिण्डसंस्थान्फलं कांक्षितांश्च कबन्धनिष्पावकपेलवांश्च॥ २३॥
हंसान्मयूरान्कुररांस्तथा च कारण्डवांश्चैव शिलीमुखांश्च ।
गृध्रानुलूकानथा वापि चाषान् कपोतगोधाशुकसारिकाश्च ॥ २४॥
पलाशमूलोर्णवपूर्णदेहांश्चर्मावबद्धां मृदुचित्रगात्राम् ।
वरत्रयन्त्रैर्विविधैः सुयुक्तां काष्ठावसक्तैर्बहुभिः प्रकारैः ॥ २५॥
चलान् स्थिरांश्चाप्रगतांश्च विद्वान्न्यसेद् यथा व्यायामायोर्ध्वसंस्थान्।
व्याघ्रान्मृगेन्द्रान्पृषतान्रूरुंश्च मृगान् सगोकर्णवराहवक्त्रान् ॥ २६॥
गोमायुमार्जारशशांस्तथान्यानृक्षान्मृगाश्चन्द्रमयेन्दुपूर्णान् ।
अन्यान्समीपोपगतान्मृगांश्च विधानवित्तान्प्रतियन्त्रसंस्थान् ॥ २७॥
जातांस्तथान्यांश्च बहुप्रकाराननेकसंस्थानबिवद्धदेहान् ।
नानाविधैस्तैर्विशिखभ्रमस्थः सन्धानयोगैस्त्रिविधैश्च हन्यात् ॥ २८॥

—वि० ध० पृष्ठ ३०४

को अपने बाण के पुङ्ख भाग से आच्छादित करके उसकी ओर दृढ़तापूर्वक शर-सन्धान करे। जो लक्ष्य भ्रमणशील, अत्यन्त चञ्चल और सुस्थिर हो उसपर सब ओर से प्रहार करे। उसका भेदन और छेदन करें तथा उसे पीड़ा पहुँचायें॥ १७-१८॥

कर्मयोगविधान का ज्ञाता पुरुष इस प्रकार समझ-बूझकर उचित विधि का आचरण (अनुष्ठान) करे। जिसने मन, नेत्र और दृष्टि के द्वारा लक्ष्य के साथ एकता स्थापित करने की कला सीख ली है, वह योद्धा यमराज को भी जीत सकता है॥ १९॥

पत्ते, तृण और ऊन से बनाये हुए, चारों ओर चर्म लिपटे हुए चिकने और सुन्दर शरीरवाले मृगादि पशुओं के पुतले बनाकर उन्हें चमड़े की रस्सी से काष्ठ एवं यन्त्रों में अनेक प्रकार से बाँधे॥ २५॥ चलते हुए, स्थिर, दौड़ते हुए और ऊपर स्थित लक्ष्यों को यथास्थान यन्त्रों से संयुक्त करके रखे। इसमें व्याघ्र, सिंह, चितकबरा हरिण, रुरु (बड़ा काला हरिण) गोकर्ण (हरिण-विशेष) वक्र दाँतोंवाले, सूअर, गीदड़, बिल्ले, खरगोश, रीछ एवं अन्य भी बहुत प्रकार के चन्द्रमा के सदृश देदीप्यमान पशुओं की प्रतिकृति बनाकर उन्हें यन्त्रों पर व्यवस्थित हुए लक्ष्यों पर धनुर्धर घूमता हुआ तीनों सन्धानों से बाण चलाकर उनका वेधन करे॥ २६-२७-२८॥

१. अधिकं भ्रमणं तस्य तस्माद् वेध्यात् प्रकीर्तितम्।
२. लक्ष्यं संयोज्येत् तत्र पत्रि यत्र गतं दृढम्।
३. समन्तात्ताडयेद् भिन्द्याच्छेदयेत् व्यथयेदिति।
४. योगशिक्षुर्यमं जयेत्।

Scanned by CamScanner

चलेषु यन्त्र लक्ष्येषु बाणसिद्धिश्च जायते॥ २८॥

—(कामन्दकीय नीतिसार स० १५ प्र० २३) पृ० ३३३

वाशिष्ठधनुर्वेदसंहितायाम्—

कृतोपवासः शिष्यस्तु धृताजिनः परिग्रहः। बद्धाञ्जलिपुटस्तत्र याचयेद् गुरुतो धनुः॥ १८॥
शिष्याय मानुषं चापं धनुर्मन्त्राभिमन्त्रितम्। काण्डात्काण्डाभिमन्त्रेण दद्यात्वेदविधानतः॥ १९॥
प्रथमं पुष्पवेधं च फलहीनेन पत्रिणा। ततः फलयुतेनैव मत्स्यवेधं च कारयेत्॥ २०॥
मांसवेधं ततः कुर्यादेवं वेधो भवेत् त्रिधा। एतैर्विधैः कृतैः पुंसां शराः स्युः सर्वसाधकाः॥ २१॥
एवं वेधत्रयं कुर्याच्छंखदुंदुभिनिःस्वनैः। ततः प्रणम्य गुरवे धनुर्बाणान् निवेदयेत्॥ २२॥

वाशिष्ठधनुर्वेदसंहितायां लक्ष्यभेदाः—

लक्ष्यं चतुर्विधं ज्ञेयं स्थिरं चैव चलं तथा। चलाचलं द्वयचलं वेधनीयं क्रमेण तु॥ ९४॥
आत्मानं सुस्थिरं कृत्वा लक्ष्यं चैव स्थिरं बुधः। वेधयेत् त्रिप्रकारं तु स्थिरवेधी स उच्यते॥ ९५॥
चलं तु वेधयेद् यस्तु आत्मस्थानेषु संस्थितः। चलं लक्ष्यं तु तत्प्रोक्तमाचार्येण शिवेन वै॥ ९६॥
धन्वी तु चलते यत्र स्थिरलक्ष्ये समाहितः। चलाचलं भवेत् तच्च ह्यप्रमेयमचिन्तितम्॥ ९७॥

कामन्दकीय नीतिसार में—यन्त्रों पर स्थित चलते हुए लक्ष्यों पर निशाना मारने से बाणों की सिद्धि हो जाती है॥ २८॥

वाशिष्ठधनुर्वेदसंहिता में—धनुर्वेद की शिक्षा ग्रहण करने का इच्छुक शिष्य उपवास करके मृगचर्म को धारण करे और दोनों हाथ जोड़कर गुरु से धनुष माँगे॥ १८॥ गुरु योग्य शिष्य को मानुष चाप धनुष के मन्त्र (काण्डात्....) को बोल वेद की विधि के अनुसार देवे॥ १९॥

अभ्यास करते समय सबसे पहले फलरहित तीर से पुष्प को सामने रखकर उसका वेध करना चाहिये। इसमें सफलता मिल जाने पर फलसहित बाण से मछली पर निशाना मारने का अभ्यास करवावे॥ २०॥

इसके पश्चात् मांस पर निशाना मारे। इस प्रकार यह तीन प्रकार का वेध होता है। इस विधि से अभ्यास करने पर धनुर्धारी के बाण सब कार्यों के साधक हो जाते हैं॥ २१॥

यह तीन प्रकार का वेध शङ्ख, दुन्दुभि (ढोल-नगाड़े) आदि के शब्दसहित करे (ये वाद्य वेध करते समय प्रोत्साहित करने के लिये बजते रहें)। वेध का अभ्यास करने के पश्चात् गुरु को नमस्कार करे और धनुष-बाण उन्हें दे देवे॥ २२॥

वाशिष्ठधनुर्वेद में लक्ष्य के भेद—चार प्रकार का लक्ष्य होता है। स्थिर, चल, चलाचल और द्वयचल। इनका क्रम से वेध करना चाहिये॥ ९४॥

अपने-आपको स्थिर करके जो तीन प्रकार (ऊर्ध्व; अध, सम लक्ष्य) के स्थिर लक्ष्यों का वेधन करें, उसे स्थिरवेधी कहते हैं॥ ९५॥

स्वयं स्थित होकर जब चलते हुए लक्ष्य को बींधा जाये तो उसे धनुर्वेद के प्रवक्ता महादेवजी ने चल लक्ष्य कहा है॥ ९६॥

जहाँ धनुषधारी स्थिर लक्ष्य पर ध्यान देते हुए चले तो उसे चलाचल लक्ष्य कहते हैं। यह अप्रमेय (बिनाप्रमाण विशेष) और अचिन्तित (ध्यान में न आनेवाला) लक्ष्य है, अर्थात्

Scanned by CamScanner

उभावेव चलौ यत्र लक्ष्यं चापि धनुर्धरः। तद् विज्ञेयं द्वयचलं श्रमेण बहु साध्यते॥ ९८॥

श्रममहिमा—

श्रमेण चित्रयोधित्वं श्रमेण प्राप्यते जयः। तस्माद्गुरु समक्षं हि श्रमःकार्यो विजानतः॥ १००॥
प्रथमं वामहस्तेन यः श्रमं कुरुते नरः। तस्य चापक्रिया सिद्धिरचिरादेव जायते॥ १०१॥
वामहस्ते सुसंसिद्धे पश्चाद् दक्षिणमारभेत्। उभाभ्यां च श्रमं कुर्यान्नाराचैश्च शरैस्तथा॥ १०२॥
वामेनैव श्रमं कुर्यात् सुसिद्धे दक्षिणकरे। विशाखेनासमेनैव रथी व्याये च कैशिके॥ १०३॥
उदिते भास्करे लक्ष्यं पश्चिमायां निवेशयेत्। अपराह्णे च कर्त्तव्यं लक्ष्यं पूर्वदिगाश्रितम्॥ १०४॥
उत्तरेण सदा कार्यमवश्यमवरोधिकम्। संग्रामेण विना कार्यं न लक्ष्यं दक्षिणामुखम्॥ १०५॥

—वा० ध०

आकाशभैरवे—श्रमस्य परिभाषा—

पुरतो वर्त्तमानस्य लक्ष्यस्य बहुधा शितैः। शरैराकर्णमाकृष्टैर्भेदनं यत् तदद्रिजे॥ ४॥
श्रम इत्युच्यते पुम्भिर्धनुर्वेदविशारदैः। श्रम एव परं ज्ञेयः श्रम एव परं बलम्॥ ५॥
श्रम एव पराकीर्तिर्धानुष्कस्य विशेषतः। तस्मादवश्यं धानुष्को भवेच्छ्रमपरिश्रमः॥ ६॥
प्रत्यहं प्रयतः प्रातः सायञ्च वरवर्णिनि। य एकस्मिन्नपि दिने धन्वी न कुरुते श्रमम्॥ ७॥

इसकी सिद्धि परिश्रम साध्य है॥ ९७॥

जब लक्ष्य और धनुर्धर दोनों ही चल रहे हों तो इसे द्वयचल जानना चाहिये। इसकी सिद्धि बहुत श्रम से होती है॥ ९८॥

श्रममहिमा—श्रम से ही चित्रयोधा बनता है। श्रम से ही विजयश्री मिलती है, अतः बुद्धिमान् व्यक्ति को गुरु के समक्ष ही धनुष-बाण का अभ्यास करना चाहिये॥ १००॥

जो योधा पहिले बायें हाथ से लक्ष्यवेध का अभ्यास करता है, उसे शीघ्र ही सफलता मिलती है॥ १०१॥

बायें हाथ से लक्ष्यवेधन में सफलता मिलने पर पुनः दाहिने हाथ से निशाना साधे और पश्चात् दोनों ही हाथों से नाराच (लोहे के बाण) और शरों का अभ्यास करे॥ १०२॥

दाहिने हाथ के सिद्ध हो जानें पर रथी विशाख अथवा असमपाद, पवित्रे और कैशिक व्याय से बायें हाथ से ही लक्ष्य साधन करे॥ १०३॥

सूर्योदय काल में पश्चिम दिशा में एवं दोपहर के पश्चात् पूर्व दिशा में अभ्यास करना उचित है॥ १०४॥

उत्तर दिशा में सदा ही लक्ष्यवेधन का अभ्यास कर सकते हैं, किन्तु संग्राम के बिना दक्षिण दिशा में मुख करना उचित नहीं, क्योंकि दक्षिण में सूर्य मुख के सम्मुख पड़ता है॥ १०५॥

श्रम की परिभाषा—हे पार्वती! सामने स्थित लक्ष्य को बहुत-से तीक्ष्ण तीरों से कान तक धनुष खेंचकर जो वेधन किया जाता है उसे धनुर्वेद के ज्ञाताओं ने "श्रम" कहा है॥ ४॥

श्रम ही उत्कृष्ट ज्ञान-बल और कीर्तिकारक है, इसलिये धनुर्धर को श्रम में अवश्य ही परिश्रम करना चाहिये॥ ५-६॥

हे सुरूपे! प्रतिदिन प्रातः और सायंकाल धनुष चालन का अभ्यास करना उचित है। जो योद्धा एक दिन भी श्रम को छोड़ देता है तो हे उमे! उसकी मुष्टि और दृष्टि विचलित हो जाती है,

Scanned by CamScanner

तस्य दृष्टिश्च मुष्टिश्च नानाकारा चलत्युमे। तस्मात् कृतश्रमेणैव सङ्ग्रामे प्राप्यते जयः॥ ८॥
चन्द्रहीना यथा रात्रिः पुष्पहीना यथा लता। तथैव श्रमहीनाऽपि धनुर्विद्या वरानने॥ ११॥

—आकाशभैरवः १३६

वाशिष्ठधनुर्वेदे—

शतैश्च काण्डानां यो हि लक्ष्यं विसर्जयेत्। सूर्योदये चास्तमाने स ज्येष्ठो धन्विनां भवेत्॥ १०८॥
त्रिशतैर्मध्यमश्चैव द्विशताभ्यां कनिष्ठकः।

अथ श्रमक्रिया—

क्रियाकलापान्वक्ष्यामि श्रमसाध्यान्शुचिस्मताम्। येषां विज्ञानमात्रेण सिद्धिर्भवति नान्यथा॥ ११७॥
प्रथमं चापमारोप्य चूलिकां बन्धयेत् ततः। स्थानकं तु ततः कृत्वा बाणोपरि करं न्यसेत्॥ ११८॥
तोलनं धनुषश्चैव कर्त्तव्यं वामपाणिना। आदानं च ततः कृत्वा सन्धानं च ततः परम्॥ ११९॥
सकृदाकृष्टचापेन भूमिवेधं न[1] कारयेत्। नमस्कुर्याच्च मां विघ्नराजं गुरुंधनुः शरान्॥ १२०॥
याचितव्या गुरोराज्ञा बाणस्याकर्षणं प्रति। प्राणवायुं प्रयत्नेन प्राणेन सह पूरयेत्॥ १२१॥

—वा० धनु०

कुम्भकेन स्थिरं कृत्वा हुङ्कारेण विसर्जयेत्। इत्यभ्यास क्रिया कार्या धन्विना सिद्धिमिच्छताम्॥ १२२॥
षण्माषात्सिध्यते मुष्टिः शराः संवत्सरेण तु। नाराचास्तस्य सिध्यन्ति यस्य तुष्टो महेश्वरः॥ १२३॥

अतः श्रम का निरन्तर अभ्यास करने से ही संग्राम में विजय मिलती है, अन्यथा नहीं॥ ७-८॥

हे सुमुखी! जैसे चन्द्रमा के बिना रात्रि सुशोभित नहीं होती, जैसे पुष्प के बिना बेल अच्छी प्रतीत नहीं होती, वैसे ही श्रम के बिना धनुर्विद्या भी शोभा नहीं देती॥ ११॥

वाशिष्ठधनुर्वेद में—सूर्योदय एवं अस्त के समय जो चार सौ बाणों को निशाने पर छोड़े, वह धनुषधारियों में श्रेष्ठ होता है। तीन सौ बाण छोड़नेवाला मध्यम और दो सौ बाण छोड़नेवाला कनिष्ठ योद्धा कहलाता है॥ १०८½॥

श्रम-क्रिया—शुद्ध हृदयवालों के लिये धनुष की क्रिया इत्यादि का कथन करता हूँ, जिनके सम्यग्ज्ञान से ही सिद्धि मिलती है, अन्यथा नहीं॥ ११७॥

प्रथम धनुष पर प्रत्यञ्चा चढ़ाकर चूलिका (दस्ताना) को बाँधे, पुनः स्थान (आलीढ़ादि) में स्थित होकर बाण के ऊपर हाथ रखे॥ ११८॥

धनुष का उत्तोलन बायें हाथ से करना चाहिये। इस प्रकार पहली बार खींचे हुए धनुष से भूमि-वेध न करे। हे विश्वामित्र! महादेव, गणेश, गुरु और धनुष बाण को नमस्कार करे॥ १२०॥

पुनः गुरु से शरसन्धान की आज्ञा माँगनी चाहिये। प्राणवायु को प्रयत्नपूर्वक भीतर लेकर (पूरक क्रिया) कुम्भक से उसे स्थिर करे और पुनः हुङ्कारसहित रेचक करे। सिद्धि के इच्छुक धनुर्धरों को यह अभ्यास अवश्य करना चाहिये॥ १२१-१२२॥

मुष्टि (पताका वज्रमुष्ट्यादि) छह मास में सिद्ध होती है। शर (बाण) एक वर्ष में सिद्ध

---

१. च कारयेदिति वीरमित्रोदये लक्षणप्रकाशे (पृष्ठ २८७)

Scanned by CamScanner

पुष्पवद् धारयेद्बाणं सर्पवत् पीड्येत् धनुः। धनवच्चिन्तयेल्लक्ष्यं यदीच्छेत्सिद्धिमात्मनः॥ १२४॥
क्रियामिच्छन्ति चाचार्या दूरमिच्छन्ति चेतरे॥ १२५॥
हीनेनापीषुणा तस्मात् प्रशस्तं लक्ष्यवेधनम्॥ १२६॥ —वा० ध०

लक्ष्यस्य दूरत्वम्

[१]षष्ठी धन्वन्तरे लक्ष्यं ज्येष्ठं लक्ष्यं प्रकीर्तितम्। चत्वारिंशन्मध्यमं च विंशतिश्च कनिष्ठकम्॥ १०६॥
—वा० ध०

मानसोल्लासे—
उत्तमं द्विशतं प्रोक्तं शतं सार्धं तु मध्यमम्। विंशं शतं कनिष्ठं स्याद् दूरे धन्वन्तरे क्षितौ॥ १५३॥
—मानसो० पृष्ठ १६७

वीरमित्रोदये—
षष्ठी धन्वन्तरे लक्ष्यं ज्येष्ठं लक्ष्यं प्रकीर्तितम्। चत्वारिंशन्मध्यमं च विंशतिश्च कनिष्ठकम्॥
शराणां कथितं ह्येतत् नाराचानामथोच्यते। [१]चत्वारिंशच्च त्रिंशच्च षोडशैव भवेत् ततः॥
—वीरमित्रोदये लक्षणप्रकरणे, पृष्ठ २८७

होते हैं। (एक वर्ष में निशाना लगाना आता है) और नाराच बाण उसके ही सिद्ध होते हैं, जिसपर महादेवजी की कृपा हो। यह बहुत परिश्रम साध्य है॥ १२३॥

सफलता चाहनेवाला धनुर्धर पुष्प के समान (हल्का) बाण ले। सर्प के समान (लचकनेवाला) धनुष को झुकाये, खींचे और धन के समान (एकाग्रचित्त) लक्ष्य का चिन्तन करे॥ १२४॥

आचार्य (धनुर्विद्या के मर्मज्ञ) क्रिया (सन्धानादि क्रिया) को ठीक करना, भार्गव बाण दूर जाकर पड़े ऐसी, राजा दृढ़ वस्तु कट जाये ऐसी और अन्य लोग निशाना अच्छा लगे, इसकी इच्छा करते हैं॥ १२५॥

लोगों का चित्त निशाना लगाने में ही प्रसन्न होता है, अतः हीन बाण (नपुसंक) से भी लक्ष्य को बींधना अच्छा है॥ १२६॥

लक्ष्यस्य दूरत्वम्—साठ धनुष (२४० हाथ=१२० गज) की दूरी पर स्थित लक्ष्य को बींधना उत्तम, चालीस धनुष (८० गज) का मध्यम और बीस धनुष (४० गज) का निकृष्ट लक्ष्य कहा गया है॥ १०६॥

मानसोल्लास में—उत्तम लक्ष्य दो सौ धनुष (४०० गज), मध्यम डेढ़ सौ धनुष (३०० गज) और अधम एक सौ बीस धनुष (२४० गज) गज की दूरी पर लक्ष्यभेदन कनिष्ठ कहलाता है॥

वीरमित्रोदय में—साठ धनुष अन्तरवाला लक्ष्य ज्येष्ठ, चालीस का मध्यम और बीस का कनिष्ठ कहा जाता है।

यह लक्षण शरों का कहा है। अब नाराचों (लोहे के बाण) की दूरी कही जाती है। इनकी दूरी चालीस धनुष (८० गज) की उत्तम, तीस धनुष (६० गज) की मध्यम और सोलह धनुष (३२ गज) की अधम होती है।

---

१. अस्यार्थो वाशिष्ठ धनुर्वेद भाषाकारेण श्री हरदयालु स्वामिनान्यथैव कृतः।

Scanned by CamScanner

आकाशभैरवतन्त्रे—

षष्ठी हस्तान्तरं लक्ष्यमुत्तमं परिकीर्तितम्॥ २९॥
चत्वारिंशत् करैर्मध्यमधमं स्यात्तदर्धतः॥ ३०॥ —पटल १३६

चन्द्रकस्य मानम्—

लक्ष्यं च पुरुषोन्मानं कुर्याच्चन्द्रकसंयुतम्॥ १०९॥
ऊर्ध्वभेदी भवेज्ज्येष्ठो नाभिभेदी च मध्यमः। पादभेदी तु लक्ष्यस्य स कनिष्ठो मतो भृगो॥ १११॥
—वा० ध०

मानसोल्लासे—

षोडषाङ्गुलवृत्तं तु स्थूलं लक्ष्यमुदाहृतम्। अङ्गुलद्वितयं सूक्ष्मं पञ्चगुंजाशिरोरुहम्॥ १५०॥
आकृष्य ताडयेत् तत्र चन्द्रकं षोडशाङ्गुलम्॥ ८॥ —अग्नि पुराण अ० २५०
उरःसमं समं लक्ष्यं मनुष्योत्सेधमानतः। तदूर्ध्वमुच्चं लक्ष्यं स्यात् तदधो नीचमुच्यते॥ १२९॥
—मानसोल्लासे

अथ लक्ष्यास्खलनविधि—वाशिष्ठधनुर्वेदे—

विशाखस्थानकं हित्वा[1] समसंधानमाचरेत्। गोपुच्छमुखबाणेन सिंहकर्णेन मुष्टिना॥ १२७॥
आकर्षेत्कौशिकव्यायेन न शिखाश्चालयेत्ततः। पूर्वापरौ समं कार्यौ समांसौ[2] निश्चलौ करौ॥ १२८॥
चक्षुषी स्पन्दयेन्नैव दृष्टिं लक्ष्ये वियोजयेत्। मुष्टिनाऽऽछादितं लक्ष्यं शरस्याग्रे वियोजयेत्॥ १२९॥
मनोदृष्टिगतं कृत्वा ततः काण्डं विसर्जयेत्। स्खलत्येव कदाचिन्न लक्ष्ये योधो जितश्रमः॥ १३०॥

आकाशभैरवतन्त्र में—साठ हाथ का लक्ष्य उत्तम, चालीस हाथ का मध्यम और बीस का अधम होता है॥ ३०॥

चन्द्रकस्य मानम्—पुरुष की लम्बाई जितना लक्ष्य चन्द्रक (चाँदमारी) से युक्त रखना चाहिये इस लक्ष्य के ऊर्ध्व भाग को वेधन करनेवाला ज्येष्ठ, नाभि भाग को वेधनेवाला मध्यम और पैरों को वेधनेवाला कनिष्ठ माना जाता है। यह भृगुजी का मत है॥ १०९-१११॥

मानसोल्लास में—सोलह अङ्गुल का लक्ष्य (चन्द्रविन्दु) स्थूल लक्ष्य माना जाता है और दो अङ्गुल का लक्ष्य सूक्ष्म लक्ष्य कहा जाता है।

अग्निपुराण में—धनुष पर बाण चढ़ाकर सोलह अङ्गुल परिमाणवाले चन्द्रक (चाँदमारी) का वेध करे॥ ८॥

मानसोल्लास में—मनुष्य की छाती के समान ऊँचे लक्ष्य का वेधन सम, उससे ऊँचे पर ऊर्ध्व और नीचे पर अधम लक्ष्य कहलाता है॥ १२९॥

अचूक लक्ष्य साधन की विधि—विशाखस्थान में स्थित होकर समसन्धान करे। गोपुच्छ बाण को सिंहकर्ण मुष्टि से पकड़कर कैशिक व्याय से खींचे और शिखा भी न चलावे। बायें और दाहिने दोनों कन्धे समान और स्थिर रहें। आँखें भी न झपककर दृष्टि को लक्ष्य पर स्थित करे। लक्ष्य को मुष्टि से आच्छादित (ढक) कर बाण को लक्ष्य की सीध में करे। मन और

---

१. स्थानके स्थित्वा इति वीरमित्रोदये लक्षणप्रकाशे, पृष्ठ २८८
२. समासौ—वीरमित्रोदये ल० २८८
३. अस्यार्थो हरदयालुस्वामिना हित्वा=त्यक्वा (छोड़कर) इति कृतः। तच्चाशुद्धः।

Scanned by CamScanner

अथ शीघ्रसंधानम्—

आदानं चैव तूणीरात् संधानं कर्षणं तथा। क्षेपणं च त्वरायुक्तो बाणस्य कुरुते तु यः॥ १३१॥
नित्याभ्यासवशात् तस्य शीघ्रसंधानता भवेत्। मुष्ट्यापताकया बाणं स्त्रीचिह्नं दूरपातनम्॥ १३२॥

वीरमित्रोदये—

प्रत्यालीढकृते स्थाने ह्यधः संधानमाचरेत्। मुष्ट्या पताकया बाणं स्त्रीचिह्नं दूरपातनम्॥

अथ दृढभेदिताः—

प्रत्यालीढे कृते स्थाने ह्यधः संधानमाचरेत्। दर्दुरस्थानमास्थाय ह्यूर्ध्वं धारणमाचरेत्॥ १३३॥
स्कन्धव्यायेन वज्रस्य मुष्ट्या पुंमार्गणेन च। अत्यन्तसौष्ठवाद् बाह्वोर्जायते दृढभेदिता॥ १३४॥

शराणां दशगतयः—भारतभावदीपे—

उन्मुख्यभिमुखीतिर्यङ्मन्दा गोमूत्रिका ध्रुवा। स्खलिता यमकाक्रान्ता क्रुष्टेतीषुगतीर्विदुः॥

—शिरो हृदयपार्श्वदेशस्पृशस्तिस्रः

मन्दा—ईषद् भिन्नत्वक्। गोमूत्रिका—कवचनिकृन्तनी, सव्यापसव्यगामिनी। ध्रुवा—नियमेन लक्ष्यभेदिनी। स्खलिता लक्ष्यच्युता। यमकाक्रान्ता—लक्ष्यं भित्वाऽसकृन्निर्गता।

दृष्टि को भी लक्ष्य पर स्थित करके बाण को छोड़े। विधि से अभ्यास करनेवाले योद्धा का निशाना कभी नहीं चूकता, क्योंकि उसने श्रम को जीत लिया है॥ १२७-१३०॥

शीघ्रसंधानम्—तूणीर (तरकस) से बाण निकालना, धनुष पर चढ़ाना, कान तक खेंचना और फेंकना—इन सब कार्यों का जो शीघ्रतासहित नित्य अभ्यास करता है, उसकी शीघ्रसन्धान-सिद्धि हो जाती है॥ १३१½॥

दूरपात—पताका नामक मुष्टि से स्त्रीचिह्नयुक्त बाण दूर जाकर गिरता है॥ १३२॥

वीरमित्रोदय में—प्रत्यालीढ़ स्थान में स्थित होकर अधःसन्धान करे और पताकामुष्टि तथा स्त्रीचिह्न बाण का सन्धान करे तो यह दूर जाकर लक्ष्य को मारता है।

दृढ़भेदिता—प्रत्यालीढ स्थान में स्थित होकर अधः सन्धान करे। दर्दुरस्थान में स्थित होकर ऊर्ध्व सन्धान करे। स्कन्ध व्याय से धनुष खेंचकर वज्रमुष्टि से पुरुष बाण को फेंके। समुचित रूप से भुजाओं द्वारा फेंकने पर पूर्वोक्त प्रकार से दृढ़ लक्ष्य के भेदन की सिद्धि (सफलता) प्राप्त हो जाती है॥ १३३-१३४॥

शरों की दश गतियाँ

१. **उन्मुखी०**—शिर का स्पर्श करनेवाली।

२. **अभिमुखी**—हृदय का वेधन करनेवाली।

३. **तिर्यक्**—शर को तिरछा छोड़ने पर पार्श्वभागों में प्रहार करनेवाली।

४. **मन्दा**—जिससे त्वचामात्र ही आहत हो।

५. **गोमूत्रिका**—जिस प्रकार बैल चलता हुआ मूत्र करे, उसकी आकृति भूमि पर जैसी बनती है, उस सदृश बाण की गति गोमूत्रिका कहलाती है। इससे कवच काटा जाता है। इसमें बाण दायें या बायें जाते हैं।

Scanned by CamScanner

क्रुष्टा—लक्ष्यैकदेशस्य बाह्वादेर्हन्त्रीति नवगतयः। दशमी गतिस्तु शिरसा सह दूरपातिनी अतिक्रुष्टा नाम। *—महाव्कर्णपर्व २०।२२ (भारतभावदीप, पृष्ठ ३३)*

अथ हीनगतयः—वाशिष्ठधनुर्वेदे—

सूचीमुखा मीनपुच्छा भ्रमरी च तृतीयका। शराणां गतयस्तिस्त्रोऽप्रशस्ताः कथिता बुधैः॥ १३५॥
सूचीमुखा गतिस्तस्य सायकस्य प्रजायते। पत्रं विलोपितं यस्य ह्यथवा हीनपत्रकम्॥ १३६॥
कर्करीतन्तु चापेन यैः कृष्टो हीनमुष्टिना। मत्स्यपुच्छा गतिस्तस्य सायकस्य प्रकीर्तिता॥ १३७॥
भ्रमरी कथिता ह्येषा शिवेन श्रमकर्मणि। ऋजुत्वेन विना याति क्षेप्यमाणस्तु सायकः॥ १३८॥

—वा ध०

अथ बाणानां लक्ष्यस्खलनगतयः—

वामगा दक्षिणा चैव ऊर्ध्वगाऽधोगमा तथा। चतस्रो गतयः प्रोक्ता बाणस्खलनहेतवः॥ १३९॥
कम्पते गुणमुष्टिस्तु मार्गणस्य तु पृष्ठतः। संमुखी स्याद् धनुर्मुष्टिस्तदा वामे गतिर्भवेत्॥ १४०॥
ग्रहणं शिथिलं यस्य ऋजुत्वेन विवर्जितम्। पार्श्वं तु दक्षिणं याति सायकस्य न संशयः॥ १४१॥
ऊर्ध्वं भवेच्चापमुष्टिर्गुणमुष्टिरधो भवेत्। स मुक्तो मार्गणो लक्ष्यादूर्ध्वं याति न शंसयः॥ १४२॥

---

६. **ध्रुवा**—निश्चित रूप से लक्ष्य का भेदन करनेवाली।

७. **स्खलिता**—लक्ष्य से रहित गति।

८. **यमकाक्रान्ता**—जिसमें लक्ष्य को वेधन करके बाण आर-पार निकल जाये।

९. **क्रुष्टा**—लक्ष्य के एक देश बाहु आदि को काटनेवाली।

१०. **अतिक्रुष्टा**—जिसमें लक्ष्य के शिर को काटकर बाण शिरसहित दूर जाकर गिरे।

हीनगति—सूचीमुख, मीनपुच्छ और भ्रमरी ये धनुर्वेदविशारदों ने अप्रशस्त गतियाँ कही हैं॥ १३५॥

सूचीमुख (ऊपर-नीचे जाना) गति उस शर की हो जाती है, जिसके पंख ठीक न बँधे हुए हों, अथवा कम या छोटे हों॥ १३६॥

यदाजीरकसंकाशमङ्गं भूमिः सितासिता। एतज्जीरकवज्रं स्यात् तत् क्षते तत् क्षणाज्ज्वरः॥ ९६॥
भूमिः सितासितक्षेत्रा अङ्गं भृङ्गाभमिष्यते। तत्र चेन्मध्यमं न्यस्तं शेषमाप्नोति केवलम्॥ ९७॥
एतद् भ्रमरवज्रं स्यात्तत्क्षते स्यात्विशूचिका। ऊर्ध्वगं कपिलाभासमङ्गं यस्मिन्प्रतीयते।
ऊर्ध्ववज्रमिदं प्राहुर्विषवेगनिषूदनम्॥ ९८॥

लौहप्रदीपेऽपि—

ऊर्ध्वगं कपिलाभासमङ्गं यस्मिन्प्रतीयते। लाङ्गलाङ्गन्तु तद्विद्यात्स्पर्शे तस्याहिनाशनम्॥ ९९॥

भूमि श्वेत या तिलवर्ण-जैसा और पिप्पली (पीपल) जैसे अङ्गवाला कणावज्र (१५) होता है, इसके घाव में दाह होता है॥ ८९॥

कृष्णभूमि और ग्रन्थि-(गाँठ)-युक्त अङ्गवाला ग्रन्थिवज्र (१६) जानना चाहिये। यह शत्रुओं का नाश करनेवाला है॥ ९०॥ इसके घाव में अत्यन्त दाह, तृषा (प्यास) और ज्वर होता है।

शालपर्णी के पत्र सदृश अङ्ग और कृष्ण भूमिवाली छुरिका को स्थिरावज्र (१७) कहते हैं। इसके द्वारा आहत होने पर कम्पन होता है॥ ९१॥

जब तीतर के पङ्ख जैसा वर्ण और कृष्णभूमि हो तो उसे तित्तिरिवज्र (१८) कहते हैं। इससे आहत होने पर बहुत कम्पन होता है॥ ९२॥

वनमाला (जङ्गली फूलों की माला) अथवा (वन में वृक्षों की पंक्तियाँ) सदृश जिसकी आकृति हो उसे मालावज्र (१९) जानना चाहिये। इसका प्रक्षालित जल गन्धवाला होता है। इसके सम्पर्क से उष्ण जल शीघ्र ही ठण्डा हो जाता है॥ ९३-९४॥

यह जल पित्तदाह के अतिरिक्त अन्य दाह में अमृतसदृश है। इस खड्ग की प्राप्ति भाग्य से होती है॥ ९५॥

जब जीरे के आकारवाला अङ्ग और भूमि श्वेत तथा कृष्ण हो तो उसे जीरकवज्र (२०) कहते हैं, इससे आहत होने पर शीघ्र ज्वर होता है। श्वेत और कृष्णभूमि और भ्रमर की आकृतिवाला जिसका मध्यभाग सूक्ष्म होता है, भ्रमरवज्र (२१) होता है। इसके घाव में विशूचिका (सूई चुभने सदृश-पीड़ा) होती है॥ ९७॥

उठी हुई आकृतिवाला, कपिल-(भूरे)-वर्णवाला अङ्ग जिसमें हो, उसे ऊर्ध्ववज्र (२२) कहते हैं। यह वज्र विष के वेग को समाप्त करनेवाला होता है॥ ९८॥

लौहप्रदीप में भी कहा है—ऊपर को गया हुआ, कपिलाकार अङ्ग जिसमें हो, उसे

Scanned by CamScanner

अङ्गं मरीचसंकाशं भवेद् भूमिः सितेतरा। मरीचाङ्गमिदं वज्रं तत् क्षते कटुरक्तता॥ १००॥
तत् प्रक्षालनतोयेन नश्यति पीनसादयः। यदा सर्पफणाकारमङ्गं भूमिस्तु निर्मला॥ १०१॥
भुजङ्गवज्रं तद्विद्यात्तत् क्षते विषवद् रुजा। तस्य स्पर्शनमात्रेण भेकः प्राणैर्विमुच्यते॥ १०२॥
एकस्यास्य प्रसादेन कृत्स्नां शास्ति महीं नृपः। यदाश्वखुरसङ्काशं अङ्गं भूमिस्तु निर्मला॥ १०३॥
अश्वाङ्गमिति तं विद्यात् खड्गं परमदुर्लभम्। तस्य संयोगमात्रेण वाजी मन्दोऽपि धावति॥ १०४॥
तस्य क्षालनतोयेन हयानां रोगनाशनम्। एतत् क्षते भृशं मूर्च्छा दाहश्च भ्रम एव च॥ १०५॥
मयूरपिच्छसदृशं अङ्गं भूमिः सितेतरा। बर्हाङ्गमिति तं विद्यात् तत क्षते वान्तिरिष्यते॥ १०६॥
सर्पाणामिह सर्वेषामस्य स्पर्शोऽसहिष्णुता। एतदेव नृपतिभिर्भाग्यैः कुत्रापि लभ्यते॥ १०७॥
भूमिरञ्जनसंकाशा धारा चास्य शिता भवेत्। अञ्जनाख्यमिदं प्रायः सर्वदैवोपलभ्यते॥ १०८॥
धाराशुभ्रा भवेद्यस्य भूमिः कज्जलसन्निभा। कृष्णरङ्गैश्चितं वापि विद्यात् कज्जलवज्रकम्॥ १०९॥
मधुवर्णसमाभूमिरङ्गं वा मधुविन्दुवत्। क्षोद्राख्यमिति जानीयात् जयलक्ष्मी यशः प्रदम्॥ ११०॥

लाङ्गंलाकृति (वत्सनाभ) कलिहारीवज्र कहते हैं। इसके स्पर्शमात्र से ही सर्प मर जाता है॥ ९९॥ (जङ्गमविष का स्थावरविष औषध है)।

मिर्च के समान अङ्ग, कृष्णभूमिवाला मरीचवज्र (२३) होता है, इसके घाव से कटु रक्त बहता है॥ १००॥ इसके प्रक्षालित जल से पीनस (नजला) आदि नष्ट होता है।

सर्प के फण-सदृश आकृति और निर्मल (शुद्ध) भूमिवाला भुजङ्गवज्र (२४) जानना चाहिये। इसके घाव में विषवेग के समान पीड़ा होती है। इसके स्पर्शमात्र से ही मेंढक मर जाता है॥ १०१-१०२॥

केवल इस अकेले खड्ग के द्वारा समस्त पृथ्वी का शासन किया जा सकता है। घोड़े के खुर-सदृश अङ्ग और निर्मल भूमिवाला अश्ववज्र (२५) कहलाता है। यह बहुत दुर्लभ है। इसके स्पर्शमात्र से ही मन्द दौड़नेवाला घोड़ा भी तेज दौड़ने लगता है॥ १०३-१०४॥

इसके प्रक्षालित जल से घोड़ों के रोग नष्ट होते हैं। इसके घाव से शीघ्र ही मूर्च्छा, दाह और भ्रम उत्पन्न हो जाते हैं॥ १०५॥

मोर की पूँछ-जैसी आकृतिवाला और कृष्णभूमिवाला बर्हिवज्र (२६) जानना चाहिये। इसके द्वारा आहत होने पर वमन होती है॥ १०६॥

इसका स्पर्श सर्पों के लिए असहनीय है। यह राजाओं को जैसे-तैसे सौभाग्य से ही मिलता है॥ १०७॥

अञ्जन=काजल के समान भूमि और सफेद धारवाला अञ्जनवज्र (२७) होता है, यह प्रायः सर्वत्र प्राप्य होता है॥ १०८॥

जिसकी धार श्वेतवर्ण और भूमि काजल के जैसी हो अथवा काले वर्णों से युक्त हो, उसे कज्जलवज्र कहते हैं॥ १०९॥

मधु (शहद) के वर्ण-(रङ्ग)-जैसी भूमि और शहद के बिन्दु जैसी आकृतिवाला क्षौद्रवज्र (२८) जानना चाहिये। यह जय, धन और यशप्रद होता है॥ ११०॥

Scanned by CamScanner

शार्ङ्गधरेऽपि—

निम्नकक्षो भवेद् यत्र रात्रिन्दिवविलेपितः। मधुरो मधुवर्णाभः स खड्गो देववल्लभः॥ १११॥
विशेषाच्चाऽत्र रज्यन्ति सततं मक्षिकादयः। आसीमकोणिका यस्य क्षुद्राङ्गं कुण्डलीकृतम्॥ ११२॥
क्षुद्रवज्रकनामानं प्राह नागार्जुनो मुनिः। इदं कुण्डवज्रञ्च प्राह लौहार्णवे मुनिः॥ ११३॥
अस्य क्षतेषु बलवान् दाहो मम विलोकितः। यदङ्गं मक्षिकाकारं भूमिश्चैव सितासिता॥ ११४॥
स्नेहः शुष्यति चैवात्र मक्षिकाङ्गं तमादिशेत्। अङ्गं यदा तुषाकारं या च भूमिः सितासिता॥ ११५॥
तुषवज्रमिदं ख्यातं प्राह नार्गाजुनो मुनिः। अङ्गं यवफलाकारं भूमिः कृष्णासिता तथा॥ ११६॥
यवाङ्गमिति तं विद्यात्तत् स्पर्शे कण्डूसंभवः। एष खड्गाधमस्त्याज्यो यदीच्छेद् भूतिरात्मनः॥ ११७॥
अङ्गं व्रीहिप्रसूनाभं भूमिर्धूम्रा क्षतेऽतिरुक्। तद् व्रीहिवज्रं जानीयाच्छत्रूणां भयवर्धनम्॥ ११८॥
अतसीफलसङ्काशमङ्गं भूमिः सितासिता। अतसीवज्रमाहुस्तं तत् क्षते शिरसो रुजा॥ ११९॥
यदासर्षपबीजाभमङ्गं भूमिः सितासिता। खरधारः खरस्पर्शः सर्षपाङ्गः स दुर्लभः॥ १२०॥
सिंह्याकारं भवेद्यस्य अङ्गभूमिः सितासिता। सिंहीवज्रन्तु तद्विद्यात्तत्क्षते प्रलपेन्नरः॥ १२१॥
एतद् धावनतोयेन कासरोगोपनाशकम्। अङ्गं तण्डुलसंकाशं भूमिर्धूम्रा सितासिता॥ १२२॥

इसका लक्षण शार्ङ्गधर में भी कहा है—निम्न कक्षावाला कृष्ण और श्वेतवर्णवाला मधु के समान खड्ग मधुर कहलाता है। यह देवों का प्रिय है॥ १११॥

विशेषकरके इस खड्ग पर मक्खियाँ बहुत आती है। आसीम (अन्तिम अवधि) तक जिसकी कोणिका (मुड़ाव) हो, क्षुद्र आकृतिवाला गोलाकार क्षुद्रवज्र (२९) कहलाता है। यह नागार्जुन मुनि का मत है। इसको मुनि ने लौहार्णव नामक शास्त्र में कुण्डलवज्र भी कहा है॥ ११२-११३॥ इसके घाव में बहुत दाह होता है, ऐसा मैंने देखा है।

जब मक्खी के सदृश अङ्ग, श्वेत-कृष्णभूमि हो॥ ११४॥ और स्नेह (चिकने पदार्थ) का शोषण करले, उसे मक्षिवज्र (३०) कहते हैं।

तुषाकार अङ्ग और श्वेत-कृष्णभूमिवाला तुषवज्र (३१) कहलाता है, ऐसा नागार्जुन मुनि ने कहा है॥ ११५॥

जौ के सदृश अङ्ग, काली और श्वेत भूमिवाला यवव्रज्र (३२) जानना चाहिये। इसके छूने से खुजली होती है। अपना अस्तित्व रखने के लिए इस अधम खड्ग को त्यागना उचित है॥ ११६-११७॥

चावल के पुष्प-सदृश अङ्ग, धूम्रवर्ण भूमिवाला, प्रहार में अति पीड़ादायक व्रीहिवज्र (३३) होता है। यह शत्रुओं के हृदय में भयदायक है॥ ११८॥ अलसी के फल-सदृश अङ्ग और श्वेत-कृष्णभूमिवाला अतसीवज्र (३४) होता है। इसके घाव से शिर में पीड़ा होती है॥ ११९॥ जब सरसों के बीज-सदृश अङ्ग, श्वेतकृष्णभूमि, खर (मोटी) धार और खरस्पर्श (छूने में मोटा प्रतीत होना) इन लक्षणों से युक्त खड्ग सर्षपवज्र (३५) होता है। यह दुर्लभ (कठिनता से प्राप्य) है॥ १२०॥ जिस खड्ग का सिंही-(काकड़ासिंगी)-सदृश आकार, श्वेतकृष्णभूमि हो, उसे सिंहीवज्र (३६) कहते हैं। इससे आहत होने पर व्यक्ति प्रलाप करता है॥ १२१॥ इसका प्रक्षालित जल कासरोग नाशक होता है। तण्डुल (चावल) के सदृश अङ्ग, धूम्र, श्वेत और

Scanned by CamScanner

तण्डुलाङ्गमिमं विद्यात् यशः श्रीबलवर्धनम्। एतत् पर्युषितं तोयं तण्डुलोदकसन्निभम्॥ १२३॥
अस्य प्रभावान्मनुजो भ्रष्टां हि लभते श्रियम्। अङ्गञ्चेद् गोक्षुराकारं भूमिराघातनिग्रहा॥ १२४॥
खड्गाधममिदं विद्याद्गोवज्रं नाम नामतः। स्थूला दीर्घाः शिरा कृष्णा भूमिश्चैवसितासिता॥ १२५॥
शिराङ्गमिति तं ब्रूयादेनं खड्गाधमं बुधाः। शिवलिङ्गाकृतिश्चाङ्गे धारा चैव सिताथवा॥ १२६॥
शिवलिङ्गमिति तं ब्रूयाच्छत्रुपक्षनिषूदनम्। यदा व्याघ्रनखाकारमङ्गं भूमिस्तु पिंगला॥ १२७॥
नखवज्रमिदं ब्रूयात् तत्क्षते श्वयथुर्भवेत्। एतदामिषसंस्पर्शात् प्रविशेत् स्वयमेवच॥ १२८॥
ग्राहपुच्छोपमन्त्वङ्गं भूमिर्धूम्रा खराकृतिः। ग्राहाङ्गमिति जानीयाच्छकृद्वंशोपनाशनम्॥ १२९॥
अस्य स्पर्शमात्रेण जीवन्मत्स्यो जहत्यसून्। यदा मनुजनेत्राभमङ्गं भूमिः सितासिता॥ १३०॥
नेत्राङ्गमिति जानीयात् संग्रामे विजयप्रदम्। एतद् धावनतोयेन नूनमन्धोऽपि पश्यति॥ १३१॥
अङ्गं केशसमं यस्य भूमिर्धूम्रा सितासिता। केशाङ्गमिति जानीयात् क्लेशदुःखभयापहम्॥ १३२॥
निरङ्गस्थूलप्रकृतिमुपलाङ्गं विदुर्बुधाः। एतद् हि प्रायशो लोके दृश्यते द्विजसत्तम॥ १३३॥

पद्मपुराणस्य—

निरङ्गा निशिता धारा शाणे वह्निं वमत्यपि। द्रोणीवज्रमिदं ज्ञेयं पृथिव्यां नातिदुर्लभम्॥ १३४॥

काली भूमिवाला तण्डुलवज्र होता है। यह धन और बलवर्धक है। इसके प्रभाव से मनुष्य गये हुए धन सम्पति को प्राप्त करता है। इसका एकदिन रखा हुआ जल तण्डुलोदक के समान गुणकारक है॥ १२३॥ गौ के खुर सदृश आकार, आघात सहने में असमर्थ भूमिवाला गोवज्र (३८) होता है अधम होने से यह त्याज्य हैं। स्थूल दीर्घ कृष्ण शिराओंवाला और श्वेत कृष्ण भूमिवाला शिरावज्र (३९) होता है। यह खड्गों में अधम है॥ १२५॥

शिवलिङ्ग की आकृतियुक्त अङ्ग और श्वेत या तत्सदृश धारावाला शिववज्र (४०) होता है। यह शत्रुपक्ष का संहारक है॥ १२६॥

जब व्याघ्र के नख-सदृश अङ्ग और पिङ्गल भूमि हो उसे नखवज्र (४१) कहते हैं। इसके घाव में वमन होता है। यह मांस के स्पर्शमात्र से ही स्वयं उसमें घुस जाता है॥ १२७-१२८॥

मगरमच्छ की पूँछ के सदृश अङ्ग, धूम्रभूमि और कठोर आकृतिवाला ग्राहवज्र (४२) कहलाता है जो देवों का भी संहारक है॥ १२९॥ इसके स्पर्शमात्र से ही मछली जीवित होती हुई भी प्राणों को छोड़ देती है। जब मनुष्य के नेत्र सदृश अङ्ग और श्वेतकृष्णभूमि हो तो उसे नेत्रवज्र (४३) जानना चाहिये। यह संग्राम में विजय दिलानेवाला होता है॥ १३०॥ इसके प्रक्षालित (धोये हुये) जल से अन्धा भी निश्चितरूप से देखने लग जाता है॥ १३१॥ केश (बाल) के समान अङ्ग, धूम्र, श्वेत और काली भूमिवाला केशवज्र (४४) होता है। यह क्लेश भय और दुःखनाशक है॥ १३२॥

बिना विशेष अङ्ग (आकृति) और मोटा उपलवज्र (४५) होता है। यह खड्ग प्रायःलोक में सर्वत्र देखा जाता है॥ १३३॥

पद्मपुराण के अनुसार—बिना अङ्गविशेष के आकृति, तीक्ष्णधार, शाणपर चढ़ाने से अग्नि-स्फुलिङ्गों का छोड़ना, इन गुणोंवाला द्रोणीवज्र (४६) जानना चाहिये, यह सर्वत्र सुलभ है॥ १३४॥

Scanned by CamScanner

अङ्गं काकपदाकारं भूमिराघातनिःसहा। एष खड्गाधमस्त्याज्यः काकाङ्गो भूतिमिच्छता॥ १३५॥
यदा कपालमङ्गेषु दृश्यते स्पर्शतः खरम्। एतद् हि दुःखजनकं कपालाङ्गं बुधस्त्यजेत्॥ १३६॥
तन्वीपत्रा बलाङ्का या सुवर्णाङ्गासि पुत्रिका। पत्रवज्रकमाहुस्तं आयुर्वेदविदो जनाः॥ १३७॥
लौहार्णवेऽपि—
सुप (व) र्णसन्निभाभूमिरङ्गं कालं प्रतीयते। तत्पत्रवज्रं काकस्य सुप (व) र्णमुपजायते॥ १३८॥
तुवरीदलसङ्काशं अङ्गं यस्मिन् प्रतीयते। तुवरीवज्रमाहुस्तं तत् क्षते शिरसो भ्रमः॥ १३९॥
एष खड्गाधमस्त्याज्यो यदीच्छेज्जीवनं निजम्। बिम्बीदलसमा भूमिरङ्गंबिम्बीफलोपमम्॥ १४०॥
बिम्बीवज्रन्तु तद्विद्यात्तज्जलं तिक्तमुच्यते। पित्तश्लेष्मविकाराणां प्रशमाय प्रयुज्यते॥ १४१॥
प्रियङ्गुसदृशन्त्वङ्गं भूमिश्च कपिलाकृतिः। फलवज्रमिदं प्रोक्तं शाणे धूमं वमत्यपि॥ १४२॥
अङ्गं सर्षपपुष्पाभं भूमिश्चैव सितासिता। एतत् सर्षपवज्रं स्यात् शाणे वह्निं वमत्यपि॥ १४३॥
अपि कुण्डलिकां याति एतदत्यन्तकोमलम्। एतत्प्रसादात्क्षितिपः कृत्स्नां साधयते महीम्॥ १४४॥
नीलीरससमाभूमिरङ्गं नीलीतरङ्गवत्। नीलीवज्रमिदं दृष्टं शाणे वह्निशिखां वमेत्॥ १४५॥

कव्वे के पैर के आकारवाला, भूमि (धार) आघात सहने के अयोग्य काकवज्र (४७) होता है। ऐश्वर्य की कामना करनेवाले को यह अधम खड्ग त्याज्य है॥ १३५॥

कपाल-(ठीकरा)-सदृश अङ्ग और खरस्पर्श (कुण्ठित धार) वाला कपालवज्र (४८) होता है। दुःखदायी होने से बुद्धिमान् इसे छोड़ दे।। १३६॥ बलापत्र के सदृश आकृति और सुवर्णाकार असिपुत्रिका (छुरी) पत्रवज्र (४८) कहलाती है। यह आयुर्वेदविदों का मत है॥ १३७॥

लौहार्णव में भी सुवर्ण-सदृश भूमि, काला अङ्ग, कव्वे के पङ्ख सदृश आकृतिवाला पत्रवज्र होता है॥ १३८॥

तुवरी के पुष्प सदृश अङ्गवाला (तुवरीवज्र) (५०) कहलाता है, इसके प्रहार से शिर में चक्कर आते हैं॥ १३९॥ अपने जीवन को सुरक्षित रखनेवाले को इस अधम खड्ग को त्याग देना चाहिये॥ १४०॥

बिम्बी के पुष्प सदृश भूमि (कुछ नीली-श्वेत) बिम्बी (सेम) की फली के समान आकृतिवाला बिम्बीवज्र (५१) होता है। इसका जल तिक्तगुण होने से पित्त और कफ के शमनार्थ प्रयोग होता है॥ १४१॥ प्रियङ्गु-सदृश अङ्ग और कपिला भूमिवाला फलवज्र (५२) कहा है। इसे शाण पर चढ़ाने से धूँआ निकलता है॥ १४२॥

सरसों के पुष्प सदृश अङ्ग, श्वेत और कृष्णभूमिवाला सर्षपवज्र (५३) होता है। इसे शाण पर रखने से अग्नि निकलती है॥ १४३॥

इसे लपेटकर गोलाकार बनाया जा सकता है। यह बहुत ही सुकोमल होता है। इससे राजा समस्त पृथ्वी को वश में कर लेता है॥ १४४॥

नीलीरस (नीले रङ्ग) के सदृश भूमि, नीली तरङ्ग के सदृश अङ्गवाला नीलीवज्र (५४) होता है। यह शाण पर आग की लपटें छोड़ता है॥ १४५॥

Scanned by CamScanner

एष खड्गवरो नृणामरिष्टभयनाशनः। रक्तास्तिस्त्रो महारेखा भूमिश्चैव सितासिता॥ १४६॥
रक्ताङ्गमिति जानीयाद्वैरिपक्षविनाशनम्। शाणेन यस्तु रक्तां वा नीलां वा वमते शिखाम्॥ १४७॥
रक्तस्पर्शनमात्रेण स्वयमेव निकृन्तति। क्षतेऽस्य रक्तश्वयथुस्तृषादाहश्च जायते॥ १४८॥
अङ्गं वचादलसमं भूमिश्चैव सितासिता। वचावज्रमिदं ज्ञेयं तत् क्षताद् विषनाशनम्॥ १४९॥
एष खड्गवरो राज्ञा साधनीयः प्रयत्नतः। रसोनादुत्तमं ह्यङ्गं भूमिस्तस्य दलोपमा॥ १५०॥
रसोनवज्रं जानीयात् शाणे वह्निं वमत्यपि। अस्य धावनतोयेन आमवातविनाशनम्॥ १५१॥
निरङ्का निर्मला भूमिर्धारा तीक्ष्णा खरः स्वयम्। सुमनावज्रमेतत् स्याद् भुवि नात्यन्तदुर्लभम्॥ १५२॥
मञ्जिष्ठा सदृशा दीर्घास्तन्व्यो रेखाः सुविस्तराः। जिङ्गवज्रमिदं नाम सर्वकामार्थसाधनम्॥ १५३॥
अङ्गं शमीपत्रसमं भूमिर्धूम्रा सितासिता। शमीवज्रमिदं ज्ञेयं शनैश्चरमुदावहम्।
शाणेषु वमते वह्निं सहते वह्निपीडनम्॥ १५४॥
रोहितवल्कलसदृशमङ्गं भूमिः सितासिता वापि।
धूम्रागम्भीरस्वरयुक्तं धारातीक्ष्णा सिता भवेद् रेखा॥ १५५॥
रोहिताख्यमिदं वज्रं सर्वारिष्टविनाशनम्। वह्निसंस्पर्शमात्रेण किञ्चिच्चिमचिमायते॥ १५६॥
इत्ययं दुर्लभो खड्गो देवानामपि कथ्यते। शफरीवल्कलाकारमङ्गं भूमिः सितासिता॥ १५७॥

यह खड्गों में श्रेष्ठ, राजाओं के अशुभ और भय का नाशक है। तीन लाल रेखाओंवाला, श्वेत और कृष्ण भूमि॥ १४६॥ वाला रक्तवज्र (५५) जानना चाहिये। यह शत्रुपक्ष का नाश करनेवाला है। यह शाण पर रक्त और नीली शिखा को निकालता है। रक्त के स्पर्शमात्र (हल्के आघात) से ही काट देता है। इसके द्वारा आहत होने पर रक्तवमन, तृषा और दाह होता है॥ १४७-१४८॥

वच के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला वचावज्र (५६) जानना चाहिये। इसके द्वारा आहत होने पर विष के सदृश नाश होता है। अथवा विष के सदृश प्रभाव होता है। राजा को प्रयत्नपूर्वक इस खड्ग की प्राप्ति (साधना, निर्माणादि) करनी चाहिये॥ १४९॥

लहसुन के सदृश अङ्ग और उसी के समान भूमिवाला रसोनवज्र (५७) जानना चाहिये॥ १५०॥ यह शाण पर अग्निशिखा छोड़ता है। इसके प्रक्षालित जल से आमवात दूर होता है॥ १५१॥ निरङ्का (धब्बेरहित), निर्मल भूमि, तीक्ष्ण धार और खराकृतिवाला सुमनावज्र (५८) होता है। यह सुलभ है॥ १५२॥

मजीठ के सदृश दीर्घ और हल्की विस्तृत रेखाओंवाला जिङ्गवज्र (५९) होता है। यह सब कार्यों की सिद्धि करनेवाला है॥ १५३॥

शमी (जंडवृक्ष) पत्र के समान अङ्ग, धूम्र, श्वेत और कृष्णभूमिवाला शमीवज्र (६०) जानना चाहिये। यह शनैश्चरों द्वारा धारण किया जाता है। शाण पर अग्नि स्फुलिङ्ग छोड़ता है। अग्निसङ्कट को सहने में समर्थ है॥ १५४॥

रोहित (रोहेड़ा) की छाल के समान अङ्ग, श्वेत, कृष्ण अथवा धूम्रवर्णभूमि, गम्भीर स्वरयुक्त, तीक्ष्णधार और श्वेत रेखावाला रोहितवज्र (६१) होता है। यह सब सङ्कटों का नाशक है। अग्नि

Scanned by CamScanner

प्रोष्ठी वज्रमिदं प्रोक्तं न्यस्तं तरति वारिणी। एष खड्गोत्तमो राज्ञां विपक्षकुलनाशकः॥ १५८॥
कदाचिल्लभ्यते भाग्यैर्लभ्यते लभ्यते मही। अङ्गं मारिषपत्राभं भूमिः स्याद्विषमच्छविः॥ १५९॥
इत्ययं मारिषाङ्गः स्यात् पृथिव्यां नातिदुर्लभः। भृङ्गराजस्य पुष्पाभमङ्गं भूमिर्दलप्रभा॥ १६०॥
आघातं सह तेनैव एष खड्गाधमो मतः। धारातीक्ष्णा खुराकारा भूमिरङ्गविवर्जिता॥ १६१॥
आघातं सहते घोरं शाणे वह्निं वमत्यपि। खुराङ्गमिति जानीयात् पृथिव्यां नातिदुर्लभम्॥ १६२॥
निर्मला समला भूमिर्भवेच्चैव कदा कदा। मन्दा तीव्रा भवेद्धारा तडिद्वज्रस्य लक्षणम्॥ १६३॥
नीलाञ्जनसमाभूमिरङ्गं जलतरङ्गवत्। मेघाङ्गमिति जानीयाच्छाणे शीतं भवत्यपि॥ १६४॥
एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः। भर्त्तुः प्रतापं शमयेद्रविबिम्बं यथाघनः॥ १६५॥
मन्दा धारा भृशं गाढा भूमिरङ्गविवर्जिता। पर्वताङ्गमिदं नाम सर्वत्रैवोपलभ्यते॥ १६६॥
अङ्गं गुञ्जाफलसमं भूमिर्मीनदलोपमा। गुञ्जावज्रमिदं पृष्ठं तप्तं भवति घर्षणे॥ १६७॥
शाणे सिन्दूरसङ्काशं रजो वमति चासकृत्। एष खड्गवरो राज्ञा भाग्यादेवोपजायते॥ १६८॥
अस्य प्रभावात् तन्नास्ति यन्न साधयेत् नृपः। अङ्गं तनुशराकारं भूमिश्चैव सितासिता॥ १६९॥
धारा तीक्ष्णा वमति च शाणे वह्निसमाः शिखाः। शरवज्रमिदं ज्ञेयं राज्ञां वांच्छितसिद्धये॥ १७०॥

के स्पर्शमात्र से ही चमचमाहट करने लगता है॥ १५५-१५६॥ यह देवों को भी दुर्लभ है। शफरी मछली की त्वचा के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला, पानी में डालने पर भी ऊपर तैरनेवाला प्रोष्ठीवज्र (६२) कहा है, यह उत्तम खड्ग राजाओं के शत्रुओं का नाशक है। इसकी प्राप्ति भाग्य से ही होती है। प्राप्त होने पर यह समस्त पृथ्वी की प्राप्ति में सहायक है॥ १५७-१५८॥

मारिष-(शुक, तोता)-पङ्ख के समान अङ्ग, विषम छवियुक्त भूमि, सर्वसुलभ मारिषवज्र (६३) होता है॥ १५९॥

भृङ्गराज के फूल के सदृश अङ्ग, उसके सदृश वर्णवाली भूमिवाला, आघात सहने में असमर्थ, अधम, (६४) मार्कवा नामवाला खड्ग होता है॥ १६०॥

तीक्ष्णधार—खुर के सदृश आकृतिवाली भूमि, अङ्ग से रहित, घोर आघात को सहनेवाला, शाण पर अग्नि छोड़नेवाला, सर्वसुलभ खुरवज्र (६५) कहलाता है॥ १६१-१६२॥

कभी निर्मल और कभी मलयुक्त भूमिवाला, इसी प्रकार कभी मन्द कभी तीव्रधारवाला होना, यह तडित् वज्र (६६) का लक्षण है॥ १६३॥ नीले अञ्जन के सदृश भूमि और जल की तरङ्ग के समान अङ्गवाला मेघवज्र (६७) होता है। यह शाण पर भी ठण्डा ही रहता है (अग्नि नहीं निकलती)॥ १६४॥ धनैश्वर्य के रक्षार्थ इस अधम खड्ग का त्याग ही उत्तम है॥ सूर्य को ढकनेवाले मेघ के सदृश यह स्वामी के बल-प्रताप को तिरोहित कर देता है॥ १६५॥

मन्दधार, गाढ भूमि, अङ्गरहित सर्वसुलभ पर्वतवज्र (६८) होता है॥ १६६॥ गुञ्जा के सदृश अङ्ग, मछली के सदृश भूमिवाला गुञ्जावज्र (६९) होता है। यह घर्षण करने पर उष्ण हो जाता है। शाण पर चढ़ाने से सिन्दूर के सदृश अग्निकण बार-बार छोड़ता है। इसकी प्राप्ति राजा को भाग्य से ही होती है॥ १६७-१६८॥ इसके प्रभाव से राजाओं को कुछ असाध्य नहीं होता। हल्के सरकण्डे के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला, तीक्ष्णधारवाला शाण पर अग्नि सदृश

Scanned by CamScanner

दूर्वादलनिभाभूमिर्धारा तीक्ष्णा खरः स्वरः। शाणेन वमते वह्निं दूर्वावज्रं सुदुर्लभम्॥ १७१॥
अङ्गं बिल्वदलाकारं भूमिश्चैव सितासिता। बिल्ववज्रमिदं शाणे नीलपीते वमेच्छिखे॥ १७२॥
एष खड्गवरः प्रोक्तः शत्रूणां कुलनाशनः। मसूरदल-सङ्काशा भूमिरङ्गं मसूरवत्॥ १७३॥
मसूराङ्गमिदं शाणे रजो वमति चारुणम्। शोणपुष्पनिभा रेखा दीर्घाभूमिः सितेतरा॥ १७४॥
शोणाङ्गमिति जानीयात् खड्गं परमदुर्लभम्। शठीदल समाभूमिरङ्गं तत् कुसुमोपमम्।
शठीवज्रमिदं प्रायो लभ्यते गुणवत्तरम्॥ १७५॥
मार्जाररोमसदृशमङ्गं भूमिः सितेतरा। मार्जाराङ्गमिदं नाम्ना रोगशोकभयावहम्॥ १७६॥
एष खड्गाधमस्त्याज्यो यदीच्छेद् भूतिरात्मनः। केतकी पत्रसदृशमङ्गं यस्मिन् प्रतीयते॥ १७७॥
विद्यात् केतकवज्रं तद् वाराणसी समुद्भवम्।
लौहप्रदीपे—
अङ्गं मूर्वातन्तुनिभं भूमिर्मूर्व्वादलच्छविः॥ १७८॥
शाणेन वमते शुक्लां शिखां मौर्व्वी भवेत्ततः। मौर्व्वाङ्गमिदमुत्कृष्टं यशः कीर्त्तिबलावहम्॥ १७९॥
लिङ्गं तीक्ष्णं खरं गाढं शाणे वह्नेर्वमेत्कणम्। छिनत्यन्यविधं लौहं वज्राङ्गमिति तद्ववदेत्॥ १८०॥

लपट छोड़नेवाला, राजाओं की अभीष्ट-सिद्धि करनेवाला शरवज्र (७०) होता है॥ १६९-१७०॥

दूर्वा (दूब) के पत्र-सदृश भूमि, तीक्ष्णधार, खरस्वरवाला, शाण पर अग्नि निकालनेवाला दूर्वावज्र (७१) होता है, यह बहुत दुर्लभ है॥ १७१॥

बिल्वदल-(बेलपत्र)-सदृश अङ्ग, श्वेत और काली भूमिवाला बिल्ववज्र (७२) होता है। यह शाण पर नीली और पीली शिखायें छोड़ता है। यह उत्तम खड्ग शत्रुओं का नाश करनेवाला है॥ १७२॥

मसूर के पुष्प-सदृश भूमि, मसूर के सदृश अङ्गवाला मसूरवज्र (७३) होता है। यह शाण पर चढ़ाने से अरुण अग्नि-स्फुलिङ्ग छोड़ता है॥ १७३॥

शोण-पुष्प के सदृश रेखावाला, दीर्घ, कृष्णभूमिवाला शोणवज्र (७४) जानना चाहिये। यह बहुत ही दुर्लभ है॥ १७४॥

शठीपत्र-(बालछड़)-सदृश भूमि और उसके पुष्प सदृश अङ्गवाला शठीवज्र (७५) होता है। इस गुणवाला खड्ग प्राय मिल जाता है॥ १७५॥

मार्जार (बिल्ली) के रोम-सदृश अङ्ग, कृष्णभूमिवाला मार्जारवज्र (७६) नाम से प्रसिद्ध है। यह रोग, शोक और भयकारक है॥ १७६॥ अपने ऐश्वर्य की स्थिरता की कामना करनेवाले को इस अधम खड्ग का त्याग करना ही उचित है॥ १७७॥ जिसकी आकृति केतकी (केवड़ा) के सदृश हो, उसे केतकीवज्र (७७) कहते हैं। यह वाराणसी में बनता है॥ १७८॥

लोहप्रदीप में—मूर्वा (बालछड़) के रेशों के सदृश अङ्ग, मूर्वापत्र सदृशभूमि, शाण पर श्वेत शिखा को निकालनेवाला, मूर्ववज्र (७८) होता है। यह श्रेष्ठ खड्ग है और यश, कीर्ति तथा बल की प्राप्ति करानेवाला है॥ १७९॥

तीक्ष्ण लोहे (इस्पात) से निर्मित खरप्रकृतिवाला, गाढ (सुदृढ़), शाण पर अग्नि की चिनगारियाँ छोड़नेवाला, अन्य सभी लौहशस्त्रों को काटनेवाला वज्र (७९) नाम से प्रसिद्ध है।

Scanned by CamScanner

कलायपुष्प सदृशमङ्गं भूमिः सितासिता। कलायवज्रं जानीयात् तत् क्षते पाक इष्यते॥ १८१॥
अङ्गं चम्पकपुष्पाभं भूमिः कृष्णा तथा सिता। शिखां शाणे वमेच्छीतां तिक्तं तस्य जलं भवेत्॥
इदं चम्पकवज्रं स्यात् सर्वत्र विजयप्रदम्॥ १८२॥
अङ्गं बलादलसमं भूमिः शुक्ला तथेतरा। बलावज्रमिदं ज्ञेयं नानाभावं भवेद् द्रुतम्।
इत्ययं वातरोगाणां नाशने परमौषधम्॥ १८३॥
अङ्गं वटारोहसमं भूमिर्वटदलच्छविः। वटवज्रमिदं ज्ञेयं खरं खड्गाधमं बुधैः।
एतस्य स्पर्शमात्रेण नरो मुच्येत सम्पदाम्॥ १८४॥
वंशनीलीसमा भूमिः खरधारासिताकृतिः। वंशाङ्गमिति जानीयात् वंशवृद्धिकरः परः॥ १८५॥
भूमिः शालदलाकारा अङ्गं लघु सितासितम्। शालाङ्ग एषः खड्गः स्यात् पूज्यः सर्वार्थदायकः।
अयं शाणे वमेद् वह्निं धारा चाप्यथवा भवेत्॥ १८६॥
भूमिः सितासिता वापि अङ्गं ज्येष्ठीसमं लघु। ज्येष्ठीवज्रमिदं निन्द्यं न स्पृश्यं वा हितेच्छुभिः॥ १८७॥
पुराणजालसदृशमङ्गं भूमिः सितासिता। जालवज्रमिदं पूज्यं शत्रुसम्पत्तिनाशनम्॥ १८८॥
यदि शाणे वमेन्नीलां शिखां वह्निवमेच्च वा। तदैष दुर्लभः खड्गो नान्यथा भयहेतुकः॥ १८९॥

मटर के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला कलायवज्र (८०) जानना चाहिये। इसके द्वारा आहत होने पर पाक (पीप-शोथादि) होता है॥ १८०-१८१॥

चम्पक (चमेली) के पुष्प-सदृश अङ्ग और कृष्ण तथा श्वेत भूमिवाला, शाण पर शीतल लपट उगलनेवाला, चम्पकवज्र (८१) होता है। इसका जल तिक्त होता है। यह सर्वत्र विजय दिलवानेवाला होता है॥ १८२॥

बला के पत्र-सदृश (कंगूरेदार) श्वेत और कृष्णभूमिवाला, बलावज्र (८२) जानना चाहिये। यह बहुत शीघ्र ही अनेक आकृतियोंवाला बन जाता है या इससे अनेक कार्य लिये जा सकते हैं। यह वात रोगों के दूर करने में परमौषध सदृश कार्य करता है॥ १८३॥

बड़ वृक्ष के सदृश अङ्ग और उसके पत्तों के सदृश आभायुक्त भूमिवाला, खरगुणयुक्त वटवज्र (८३) होता है। यह अधम खड्ग है। इसके स्पर्शमात्र से मनुष्य सम्पतिरहित हो जाता है। (शोभा नहीं देता)॥ १८४॥

वंश (बाँस) और नीली (नील) के सदृश भूमि, खरधार और श्वेत आकृतिवाला वंशवज्र (८४) होता है। यह वंश (कुल) की वृद्धि करनेवाला है॥ १८५॥

शाल वृक्ष के पत्र के आकारवाली भूमि, हल्के श्वेत कृष्ण अङ्गवाला शालवज्र (८५) होता है। यह पूज्य और सर्व कार्यों की सिद्धि करानेवाला है। यह शाण पर अग्नि निकालता है॥ १८६॥

श्वेत और कृष्णभूमि, ज्येष्ठी के सदृश लघु अङ्गवाला ज्येष्ठीवज्र (८६) होता है। यह निन्दनीय और हित चाहनेवालों के लिए न छूने योग्य है॥ १८७॥

पुरातनजाल के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला जालवज्र (८७) होता है। यह पूज्य और शत्रुनाशक है। यदि शाण पर नीली शिखा को उगले और अग्नि प्रकट करे तो ऐसा खड्ग दुर्लभ है और किसी प्रकार का भी विघ्न नहीं करता॥ १८९॥

Scanned by CamScanner

अङ्गं पिपीलिकाकारं भूमिर्धूम्रा तथासिता। पिपीलिकाङ्ग इत्येष तत् क्षते कण्डूसम्भवः। स्वयं यदि भवेद् धूम्रः शाणे पूज्यते यस्तदा॥ १९०॥

नलपत्रसमाभूमिरङ्गं तत् कुसुमोपमम्। नलाङ्गमिति जानीयाद् भर्तुः सर्वार्थसाधकः॥ १९१॥

निरङ्का निर्मला भूमिर्घृष्टं घृष्टं वमेद्रजः। दृढा धारा भृशंस्थूला आघातं सहते न च। रजोवज्रमिदं निन्द्यं शत्रूणां विजयावहम्॥ १९२॥

कुष्माण्डबीजसदृशमङ्गं भूमिः सितासिता। कुष्मांडवज्रं जानीयात्तत् क्षते वेगनिग्रहः॥ १९३॥

अङ्गं नृरोमसदृशं भूमिर्धूम्रा सितासिता। रोमाङ्गमिति जानीयात्तत् क्षते पिडकोद्गमः॥ १९४॥

भूमिस्नुही दलसमा अङ्गं तत्कण्टकोपमम्। धारा तीक्ष्णा खरस्तीक्ष्णो लघुमानं खरस्पृशः॥ १९५॥

सुधाङ्गः खड्ग इत्येष तत्क्षते दाहतृड् भ्रमाः। मुखाक्षिकर्णनासानां दाहः पाकश्च जायते॥ १९६॥

अयं यदि च सर्पाणां फणासूपरि विश्यते। फणाविदारमाप्नोति सर्पो लोटयते शिरः। अस्य धावनतोयेन कुष्ठरोगविनाशनम्॥ १९७॥

कर्कन्धुदलपृष्ठाभा भूमिरङ्गं तु तत् समम्। कर्कन्धुवज्रं जानीयात्तत् क्षते दाहनाशनम्॥ १९८॥

एष खड्गाधमस्त्याज्यो जेतव्या यदि विद्विषः। अङ्गं बकुलपुष्पाभं भूमिस्तत् फलसन्निभा॥ १९९॥

पिपीलिका (चींटी) के सदृश अङ्ग (मध्य में लघु) धूम्र और कृष्णभूमिवाला पिपीलिकावज्र (८८) होता है। इसके द्वारा घायल होने पर खुजली होती है। यदि शाण पर स्वयं ही धूम्राकार हो जाये तो बहुत प्रशस्त है॥ १९०॥

नल-पत्र के सदृश भूमि, उसके फूल के समान अङ्गवाला नलवज्र (८९) होता है। यह धारण करनेवाले के सब कार्यों का साधक है॥ १९१॥

धब्बोंरहित और निर्मल भूमिवाला, बार-बार घिसने पर रजकणों को छोड़नेवाला, दृढ़ और मोटीधारवाला, आघात को न सहनेवाला, शत्रुओं को विजय देनेवाला (अपनी पराजय करनेवाला) रजोवज्र (९०) होता है॥ १९२॥

कुष्माण्ड (पेठे) के बीज-सदृश अङ्ग, श्वेत और कृष्णभूमिवाला कुष्माण्डवज्र (९१) जानना चाहिये। इससे आहत होने पर चेष्टाओं आदि का निरोध हो जाता है (अङ्ग अकड़ जाते हैं)॥ १९३॥

मनुष्य के रोम-सदृश अङ्ग, धूम्रवर्ण, श्वेत और कृष्णभूमिवाला रोमवज्र (९२) होता है। इससे घायल होने पर घाव के आसपास फुंसियाँ हो जाती हैं॥ १९४॥

स्नुही (थूहर) के सदृशभूमि और इसके काँटों के सदृश अङ्ग, तीक्ष्णधार, खर, तीक्ष्ण, छोटी आकृति और खर स्पर्शवाला सुधावज्र (९३) होता है। इसके घाव में जलन होती है और मुख, आँख, कान आदि पक जाता है॥ १९५-१९६॥

इसको यदि साँपों के फणों (शिर) पर रख दें तो फण फट जाता है और साँप शिर पटकता है। इसके प्रक्षालित जल से कुष्ठरोग का निवारण होता है॥ १९७॥

कर्कन्धु दल की आभायुक्त भूमि और उस सदृश ही अङ्गवाला कर्कन्धुवज्र (९४) होता है। इसके घाव में दाह नहीं होती है। शत्रुओं को जीतनेवाले को इस अधम खड्ग का परित्याग ही उचित है॥ १९८-१९९॥

Scanned by CamScanner

बकुलाङ्गमिदं पूज्यं शाणे सुरभिगन्धवत्। तन्नास्ति जगतीमध्ये यदनेन न साध्यते॥ २००॥
अङ्गं मिश्रितं यस्मिन्न किंचिद् व्यक्तमीक्षते। सर्वेषां दर्शनं वापि तीक्ष्णधारः खरः स्वरः॥ २०१॥
एष काञ्जिकवज्रः स्याद्यत्नादेवोपलभ्यते। नैनं प्राप्यापि वर्द्धन्ते शेषाश्चित्रादयोऽपि च॥ २०२॥
भूमिः कृष्णानिरङ्गा चेद्धारातीक्ष्णा दृढापि च। आघातं सहते घोरं रक्तं स्पर्शेन यो विशेत्॥ २०३॥
शाणेन वह्निं वमति ध्रुवं वाप्यति घर्षणात्। महिषाङ्गः स वै खड्गः पृथिव्यां नातिदुर्लभः॥ २०४॥
अत्यन्तनिर्मला भूमिः शरीरं प्रतिबिम्बितम्। धारा तीक्ष्णा स्वरस्तीक्ष्णः स्वच्छाङ्गं तद्विनिर्दिशेत्॥ २०५॥
तस्मिन्यदा भवेद्रेखा ऊर्ध्वा ऋत्वाख्यकं तदा। अस्मिन्नपि भवेद्वक्रा रेखा वक्राभिधन्तु तत्॥ २०६॥
एतत् त्रितयमुद्दिष्टं खड्गानां प्रवरं बुधैः। प्रायशो लभ्यते लोके यदि सर्वगुणावहम्॥ २०७॥
इतीदं निखिलं प्रोक्तं वज्राणां लक्षणं मया। प्रयत्नैर्लिखितं व्यक्तं सर्वेषां हितकाम्यया॥ २०८॥
इतः परन्तु लौहानां लक्षणं यत्र लक्ष्यते। तस्य दासो भवाम्येव प्रतिज्ञेति कृता मया॥ २०९॥
द्विलिङ्गमिश्रमालोक्य मिश्राङ्गमिति निर्दिशेत्। सर्वेषामङ्गमालोक्य सर्वाङ्गमिति निर्दिशेत्॥ २१०॥

खड्गस्य रूपाणि—

नीली कलाय-कुसुमच्छविगृञ्जनाभा, या चन्द्रनीलमणि-काचमणिप्रभा च।
भूमिश्च या मरकत-प्रतिभावभासा, खड्गस्य नीलरूपमिदं वदन्ति॥ २११॥

बकुल (मौलसरी) के पुष्प-सदृश अङ्ग, उसके फल-जैसी भूमिवाला बकुलवज्र (९५) होता है। शाण पर चढ़ाने से इससे सुरभि=गन्ध निकलती है। संसार में इसके द्वारा सभी कुछ प्राप्त होने योग्य है॥ २००॥

मिश्रित अङ्ग-(मिलीजुली आकृति)-वाला, जिसमें सब खड्गों की आकृति दिखलाई पड़ती है, तीक्ष्णधार, खर स्वरवाला काञ्जिकवज्र (९६) होता है। यह यत्न से ही प्राप्त होता है। इसको प्राप्त करने पर उसे देवता भी नहीं जीत सकते॥ २०१-२०२॥

जिसकी भूमि कृष्णवर्णवाली और अङ्गरहित हो, जिसकी धार तीक्ष्ण और दृढ़ हो, जो घोर आघात को भी सहन कर सकता हो, रक्त स्पर्शमात्र से ही जो भीतर प्रविष्ट हो जाता हो, शाण और अतिघर्षण से जिसमें अग्नि निकलती हो, उसे महिषवज्र (९७) कहते हैं। यह दुर्लभ नहीं है। सर्वत्र मिल जाता है॥ २०३-२०४॥

जिसकी भूमि निर्मल हो, जिसमें प्रतिबिम्ब (परछाई) दिखलाई दे, तीक्ष्णधार, तीक्ष्णस्वर, स्वच्छ अङ्गवाला स्वच्छवज्र (९८) कहलाता है॥ २०५॥

जब इसी में रेखा हो तो इसे ऋतुवज्र (९९) कहते हैं। इसमें ही जब तिरछी रेखा हो तो उसे वक्रवज्र (१००) नाम से पुकारते हैं॥ २०६॥

यह खड्गों के तीन भेद (उत्तम, मध्यम, अधम) सभी कह दिये गये हैं। मैंने (ग्रन्थकार) सभी के हित की कामना से प्रयत्नपूर्वक स्पष्ट लिख दिया है॥ २०७॥

लोहप्रदीप में कहे लक्षणों से अतिरिक्त यदि किसी ने खड्गादि के लक्षण विशेष बतलायें हों तो मैं उनका अनुचर बनना स्वीकार करता हूँ। यह मेरी प्रतिज्ञा है।॥ २०८-२०९॥

दो अङ्गों का मेल जिस खड्ग में हो उसे मिश्राङ्गवज्र कहे और सब अङ्गों के मेल को देखकर सर्वाङ्ग (सर्वगुणोपेत) खड्ग होता है। ऐसा निर्देश करे॥ २१०॥

अब खड्गों के स्वरूप का वर्णन किया जाता है—नील के पौधे और मटर के पुष्प

Scanned by CamScanner

तत्र चेन्निन्दितान्यङ्गान्यरिष्टानि बहून्यपि। दृश्यन्ते बहुदोषाणि तथापि गुणवत्तरम्॥ २१२॥
या कालकाम्बुदमसीरसकालसर्पशङ्कान्धकारकचभारसमाविभाति ।
भूमिश्च या भ्रमरबन्धुसमावभासा खड्गस्य कृष्णमिति रूपमिदं वदन्ति॥ २१३॥
अत्र नेत्राणि सम्पत्यै अरिष्टान्यशुभानि च। साधारणमिदं रूपं प्राह नागार्जुनो मुनिः॥ २१४॥
या प्रावृषेण्यनवभेकसमानवर्णा गोमेदरत्नसदृशापि च यस्य भूमिः।
खड्गस्य पिङ्गमिति रूपमिदं वदन्ति भर्तुर्यशोबलधनक्षय कारणाय॥ २१५॥
या मन्दधूम सदृशा च शिरीषपुष्पतुल्या विभाति मलिनापि च खड्गभूमिः।
नागार्जुनो वदति धूम्रमिदं हि रूपं भर्तुयशोबलधनावलिवर्धनाय॥ २१६॥
द्विरूपं मिश्रितं कृत्वा सङ्करं प्रवदेद् बुधः। त्रिभी रूपैः समेतन्तु खड्गं त्रिपुरसंज्ञितम्।
रूपैश्चतुर्भिः संयुक्तं चतुरं खड्गमुत्तमम् ॥ २१७॥
जातिश्चतुर्विधा प्रोक्ता खड्गानां या पुरा मया। सम्प्रत्यपि प्रयत्नेन तासां लक्षणमुच्यते॥ २१८॥

ब्राह्मणखड्गजातिः—

शुद्धाङ्गः शुद्धवर्णश्च सुनेत्रसुस्वरश्च यः। मृदुस्पर्श सुसन्धेयस्तीक्ष्णधारो महागुणः॥ २१९॥

के समान छवि, गाजर के समान आभा, चन्द्रनीलमणि और काचमणि के सदृश चमकनेवाला, जिसकी भूमि मरकतमणि के सदृश हो, ऐसे खड्ग के स्वरूप को नीलरूप कहते हैं॥ २११॥

इस खड्ग के भी बहुत निन्दित अङ्ग, अरिष्ट और बहुत-से अन्य दोष कहे हैं तब भी यह खड्ग अपेक्षाकृत् अन्य खड्गों से श्रेष्ठ है॥ २१२॥

जो तलवार काले वर्णवाली, बरसनेवाले मेघ के सदृश, काली स्याही के समान, काले सर्प जैसी, अन्धकार या काले बालों जैसे स्वरूपवाली, भारी हो, जिसकी भूमि भ्रमर सदृश हो, ऐसे खड्ग को कृष्णरूपवाला कहते हैं॥ २१३॥

इसमें भी नेत्रादि एवं अरिष्टादि अशुभलक्षण होने से इस खड्ग को साधारण (न अधिक अच्छा न बुरा) नागार्जुन मुनि ने कहा है॥ २१४॥

जो खड्ग वर्षाऋतु के प्रारम्भ में उत्पन्न हुए मण्डूक (पीले वर्णवाला) के समान वर्णवाला हो, जिसकी भूमि गोमेद मणि के सदृश हो, ऐसे खड्ग को पिङ्गरूप (पीले वर्णवाला) कहते हैं। यह धारण करनेवाले के बल, धन और कीर्ति का नाशक है॥ २१५॥

जो हल्के धूयें के समान, शिरीष (सिरस) के फूल-समान वर्णवाली जिसकी भूमि इसी वर्णवाली हो, मलिन भी हो, नागार्जुन मुनि ने इस खड्ग को धूम्रवर्णवाला खड्ग कहा है। यह धारण करनेवाले का यश, बल और धन का वर्धक है॥ २१६॥

जब खड्गों में दो रूप हों, तब उसे मतिमान सङ्कर खड्ग जाने, इसी प्रकार तीन वर्णों से युक्त को त्रिपुर और चारों वर्णों से युक्त खड्ग चतुरखड्ग होता है, यह उत्तम है॥ २१७॥

जो चार प्रकार की खड्गों की जाति मैंने पहले कही है, अब मैं उनके लक्षणों को कहता हूँ॥ २१८॥

(१) ब्राह्मण जातिवाला खड्ग—शुद्ध अङ्ग, शुद्ध वर्ण, अच्छे नेत्र, अच्छी ध्वनिवाला,

Scanned by CamScanner

खड्गं ब्राह्मणजातिं तं प्राह नागार्जुनो मुनिः। अस्य क्षते भवेच्छोथो घोरः सर्वाङ्गगोचरः॥ २२०॥
मूर्च्छा पिपासा दाहश्च ज्वरो मृत्युश्च जायते। अघृष्टं त्रिफलाकल्कमर्द्धरात्रिन्दिवोषितम्॥ २२१॥
मलिनत्वं न सन्धत्ते निर्मलं कुरुते परम्। तरुणादित्यकिरणस्पर्शादेव तृणे स्थितः॥ २२२॥
दहेत् सर्वं न तु करं पुरुषस्य हि धारिणः। गायत्र्युच्चारणमात्रेण खरतां व्रजति स्फुटम्॥ २२३॥
एष खड्गवरः सर्वमरिष्टं नाशयेद् ध्रुवम्। अस्य प्रसादात् पुरुषस्त्रिलोकमपि साधयेत्॥ २२४॥
तस्मादेव मनुष्याणां सुलभो न हि भूतले। दृश्यन्ते प्रायशः स्वर्गे कुशद्वीपे हिमालये॥ २२५॥

इति ब्राह्मणखड्गजातिः।

क्षत्रियजातिखड्गः—

धूम्रवर्णं महासारं तीक्ष्णधारं खरस्वरम्। सर्वाघातसहं सर्वनेत्रवर्णस्वराकरम्॥ २२६॥
खड्गक्षत्रियजातिं तं जानीयात्खड्गकोविदः। अस्य क्षते भवेद्दाहस्तृषानाहो ज्वरो भ्रमः॥ २२७॥
मृत्युश्च जायते शाणे वमेद्वह्निकणान् बहून्। संस्कारे चाप्यसंस्कारे नैर्मल्यं तस्य लक्ष्यते॥ २२८॥
शाणेऽप्यशाणे खरतामूर्ध्वि (युद्धे) चात्यन्त तीक्ष्णता। रक्तस्पर्शनमात्रेण विशेदन्तरमन्तरम्॥ २२९॥
अयं खड्गवरः पूज्यो मनुष्यैरपि लभ्यते॥ २३०॥

वैश्यजातिः—

नीलवर्णः कृष्णवर्णः संस्कारे निर्मलो भवेत्। शाणेन खरता चास्य घाततुल्यं निकृन्तति॥ २३१॥

छूने में मृदु (कोमल), चलाने में उत्तम, तीक्ष्ण धार, उत्तम गुणोंवाला॥ २१९॥ खड्ग नागार्जुन मुनि ने ब्राह्मणजातिवाला कहा है। इसके द्वारा आहत होने पर सभी अङ्गों में अत्यन्त शोथ (सूजन) होता है। मूर्च्छा, प्यास, ज्वर होकर मृत्यु भी हो जाती है॥ २२०॥ बिना घिसे (पीसे) हुए त्रिफला (हरड़, बहेड़ा, आंवला) के कल्क में आधी रात्रि और पूरे दिन रखने से भी इस पर मैल (जङ्ग) नहीं लगता अपितु और चमकता है। इसे तिनके पर रखने से सूर्य की किरणों के स्पर्शमात्र से ही जला देता है, परन्तु धारण करनेवाले पुरुष के हाथ को नहीं जलाता। यह गायत्रीमन्त्र के उच्चारणमात्र से ही पर्याप्त कठोर हो जाता है। यह श्रेष्ठ खड्ग है, सभी सङ्कटों का निश्चितरूप से निवारण करता है। इसकी कृपा से मनुष्य तीनों लोकों को भी विजय कर सकता है॥ २२१-२२४॥ इसीलिये यह पृथ्वी पर मनुष्यों को सुलभ नहीं है। यह स्वर्ग (त्रिविष्टप-तिब्बत) कुशद्वीप और हिमालयस्थ देशों में ही देखा जाता है॥ २२५॥

(२) क्षत्रिय जातिवाला खड्ग—धूम्रवर्णवाला, विस्तृत, तेजधार, खर स्वर, सभी आघातों को सहनेवाला, नेत्र, वर्ण और स्वरादि सभी सुलक्षणों से युक्त खड्ग को खड्गज्ञाता क्षत्रियजाति का खड्ग कहते हैं॥ २२६॥ इसके घाव में जलन होती है। तृषा, आनाह (अफारा), ज्वर, भ्रम, मूर्च्छा या प्रलाप होता है॥ २२७॥ और मृत्यु भी हो जाती है। इसे शाण पर चढ़ाने से अग्नि की चिनगारियाँ बहुत निकलती हैं। संस्कार (पानी चढ़ाना) या बिना संस्कार के भी यह शुद्ध (मलरहित) ही रहता है॥ २२८॥

यह शाण पर चढ़ाया हुआ या बिना चढ़ाया हुआ भी सदैव तीक्ष्ण रहता है। रक्तस्पर्श (हल्के आघात) मात्र से ही अन्दर प्रविष्ट हो जाता है। यह श्रेष्ठ खड्ग मनुष्यों को भी प्राप्त है॥ २२९-२३०॥

(३) वैश्यजातिवाला खड्ग—नीले और काले वर्णवाला, संस्कार द्वारा निर्मल होनेवाला,

Scanned by CamScanner

वैश्यजातिरयं खड्गः क्षते त्वङ्मात्रदर्शनम्। नात्युत्कृष्टो नातिहीनः सर्वत्रैवोपलभ्यते॥ २३१॥

शूद्रजातिः—

सजलाम्भोदसङ्काशः स्थूलधारो मृदुस्वरः। संस्कारे चैव मलिनः शाणे चापि खरेतरः॥ २३३॥
शूद्रजातिरयं खड्गः क्षते नाल्पापि वेदना। दूरादेषोऽधमस्त्याज्यो यदीच्छेद् हितमात्मनः॥ २३४॥
प्रायशः सर्वलोकेषु स्वयमेवोपदृश्यते। द्वयोर्लक्षणमालोक्य जारजं खड्गमादिशेत्॥ २३५॥
त्रयाणां लक्षणेनैव त्रिजातिं खड्गमादिशेत्। चतुर्णां लक्षणेनैव जातिसङ्करमुच्यते॥ २३६॥

अथ त्रिंशन्नेत्राणां लक्षणानि—

अङ्गं स्यात् सर्वतो वापि नेत्रमेकत्रसंस्थितम्। अतः परं तु नेत्राणां लक्षणं संप्रवक्ष्यते॥ २२७॥
नेत्रेणैकेन हस्तेन निन्दितोऽपि प्रशस्यते। यथा जातिविहीनोऽपि गुणवान् पूज्यते नरः॥ २३८॥
खड्गः सदङ्गो न च नेत्रहीनो न पूज्यते नाम्बुकरः स एव।
यथा मनुष्यः खलु सुन्दराङ्गो न कर्मयोग्यो भुवि नेत्रहीनः॥ २३९॥
चक्रपद्मे गदाशंखौ भयवर्धन्नवाङ्कुशः। छत्रं पताका वीणा च मत्स्यन्तु शिवलिङ्गकः॥ २४०॥
ध्वजार्धचन्द्रकलसाः शूलं शार्दूलनेत्रकम्। सिंहसिंहासनञ्चैव गजहंसमयूरकाः॥ २४१॥
जिह्वादन्ताश्च खड्गश्च मनुष्यश्चामरस्तथा। शैलश्चैव तथा पुष्पमाला सर्षप एव च॥ २४२॥

शाण पर चढ़ाने से तीक्ष्ण होनेवाला, आघात के समान ही काटनेवाला खड्ग वैश्यजाति का होता है। इसके द्वारा आहत होने पर त्वक्-(चमड़ी)-मात्र का दर्शन होता है। यह न बहुत श्रेष्ठ है और न बहुत निकृष्ट। यह सर्वत्र प्राप्त है॥ २३१-२३२॥

(४) शूद्र जातिवाला खड्ग—बरसनेवाले मेघ के सदृश वर्णवाला, मोटी धार, मृदु (हल्का) स्वर, संस्कार होने पर भी मलिन रहनेवाला, शाण पर चढ़ाने से भी कुण्ठित रहनेवाला शूद्रजाति का खड्ग होता है। इससे आहत होने पर थोड़ी-सी भी पीड़ा नहीं होती। अपना हित चाहनेवाले को इसका परित्याग कर देना चाहिये॥ २३३-२३४॥ यह सब स्थानों में सहज ही प्राप्त हो जाता है। दो लक्षणों से युक्त खड्ग को जारज, तीन लक्षणोंवाले को त्रिजाति और चार लक्षणों से युक्त खड्ग को सङ्कर कहते हैं॥ २३५-२३६॥

तीस नेत्रों का प्रारम्भ किया जाता है—अङ्ग तो समष्टिरूप से सर्वत्र लक्षित होता है, परन्तु नेत्र (खड्ग पर प्रशस्त चिह्न) एक स्थान पर ही होता है। इससे आगे नेत्रों के लक्षण कहते हैं॥ २३७॥ एकहस्त (खड्ग में एक हाथ दूर होनेवाले) नेत्र से निन्दित खड्ग भी प्रशस्त होता है। जैसे उत्तम कुल आदि में उत्पन्न न होने पर भी गुणवान् व्यक्ति पूजित होता है॥ २३८॥

अच्छे अङ्गादि से युक्त खड्ग भी बिना नेत्र के प्रशंसनीय नहीं है, यह कार्य योग्य नहीं होता, जैसे सुन्दर अङ्गोंवाला मनुष्य भी नेत्र के बिना काम करने में असमर्थ रहता है॥ २३९॥

चक्र, पद्म, गदा, शङ्ख, भयदायक नवीन अङ्कुश, छत्र, पताका, वीणा, मत्स्य, शिवलिङ्ग, ध्वजा, अर्धचन्द्र, कलस, शूल, शार्दूल, सिंह, सिंहासन, गज, हंस, मयूर, जिह्वा, दन्त, खड्ग (गेंडे का सींग) मनुष्य, चामर, शैल, पुष्प, माला और सर्षप—ये खड्ग के नेत्र कहे हैं। (पहले भी इनका वर्णन किया जा चुका है। यहाँ यह वर्णन अप्रासंगिक है, अथवा अन्य पुस्तक का प्रकरण उद्धृत किया गया है)॥ २४०-२४२॥

Scanned by CamScanner

चक्राकारं यदा नेत्रं खड्गस्याङ्गे प्रदृश्यते। तं चक्रनेत्रं जानीयात् भर्तुः सर्वार्थसाधनम्॥ २४३॥
अनेनैकेन खड्गेन कृत्स्नां साधयते महीम्। प्रफुल्लपद्मसङ्काशं नेत्रं पद्मदलोपमम्॥ २४४॥
यदि वा दृश्यते खड्गे पद्मनेत्रं समादिशेत्। अयं खड्गवरो यत्र तत्रैव कमलालया॥ २४५॥
ऊर्ध्वा स्थूला यदा रेखा गदाकारा प्रतीयते। गदानेत्रमिदं विद्धि सर्वशत्रुनिषूदनम्॥ २४६॥
शङ्खाकारं यदा नेत्रं खड्गमध्येऽभिदृश्यते। शङ्खनेत्रमिदं सर्वं देवानामपि दुर्लभम्॥ २४७॥
डमरुप्रतिमं नेत्रं यस्य भूमौ प्रतीयते। सर्वार्थसाधकं खड्गं तं विद्याद् विजयप्रदम्॥ २४८॥
धनुः स्वरूपं यन्नेत्रं धनुर्नेत्रमुशन्ति तम्। तस्य स्पर्शनमात्रेण मन्दोऽपि प्रमुखायते॥ २४९॥
अयं निशीथे विजने खड्गो झनझनायते। यन्नेत्रमङ्कुशाकारं तं विद्याद् गुणवत्तरम्॥ २५०॥
खड्गमङ्कुशनेत्राख्यं भर्त्तुः सर्वार्थसाधकम्। अलक्ष्मीपापरक्षोघ्नं कृत्याग्रहनिवारणम्॥ २५१॥
छत्राकारं यदा नेत्रं छत्रनेत्रं वदन्ति तम्। अस्य प्रभावात् क्षीणोऽपि सार्वभौमो भवेन्नृपः॥ २५२॥
दीनोऽपि च सुखी भूयात् सुखी भूयान्महेश्वरः। महेश्वरोऽपि सचिवः सचिवो मण्डलेश्वरः।
मण्डलेशश्चक्रवर्त्ति भवेदत्र न संशयः॥ २५३॥

जब चक्र के आकार का नेत्र अङ्ग में दिखलाई दे तो इसे चक्रनेत्र (१) कहते हैं। यह धारण करनेवाले की सभी कामनाओं को पूर्ण करता है॥ २४३॥ इस अकेले खड्ग से समस्त पृथ्वी को वश में किया जा सकता है।

खिले हुए कमल के सदृश अथवा कमल की पङ्खुड़ी के समान पद्मनेत्र (२) होता है। इस गुण से युक्त खड्ग जिसके पास होता है, वहीं लक्ष्मी निवास करती है। (लक्ष्मी का निवास भी कमल में होता है)॥ २४४-२४५॥

जिस खड्ग में गदा की आकृति-जैसी ऊँची और स्थला (स्थूल) रेखा प्रतीत हो, उसे गदानेत्र (३) जानना चाहिये। यह खड्ग सब शत्रुओं का संहारक होता है॥ २४६॥

जब खड्ग के मध्य में शङ्ख के आकारवाला नेत्र दीखे, तो इसे शङ्खनेत्र-(४)-वाला खड्ग कहते हैं। यह देवों को भी दुर्लभ है॥ २४७॥

जिसकी भूमि पर डमरु-सदृश नेत्र (५) प्रतीत हो, उस खड्ग को सब कार्यों का साधक और विजयप्रद जानना चाहिये॥ २४८॥

धनुष के समान नेत्रवाला धनुनेत्र (६) होता है। इसके स्पर्शमात्र (हाथ में लेते ही) मन्दपुरुष भी शूरवीर हो जाता है॥ २४९॥ यह खड्ग रात्रि में और एकान्त में (झन्-झन) की ध्वनि करता है।

जो नेत्र अङ्कुश की आकृतिवाला हो उसे गुणवान् जाने। इससे युक्त खड्ग को अङ्कुशनेत्र (७) कहते हैं। यह धारण करनेवाले की सब मनः कामनाओं को पूरी करता है। दारिद्र्य, पाप, राक्षस, (रोग-शोक), कृत्या (दूसरे द्वारा किया गया गुप्त प्रयोग), ग्रह आदि सभी सङ्कटों का निवारण करता है॥ २५०-२५१॥

छत्राकार नेत्रवाले खड्ग को छत्रनेत्र (८) कहते हैं। इसके प्रभाव से दुर्बल भी सार्वभौम राजा हो जाता है॥ २५२॥

दीन व्यक्ति भी सुखी हो जाता है, सुखी व्यक्ति महेश्वर हो जाता है महेश्वर, सचिव, सचिव

Scanned by CamScanner

पताकाकृतिनेत्रं चेत् सर्वसम्पत्तिकारकम्। पताकानेत्रमाहुस्तं संग्रामेविजयप्रदम्॥ २५४॥
नेत्रं वीणाकृतिर्यदा वीणानेत्रमुशन्ति तम्। निशीथे विजने खड्गो वीणावत् स्वनमावहेत्।
अस्य प्रभावात् सर्वेऽवशापि वश्या भवन्ति हि॥ २५५॥
मत्स्याकृतिर्यदानेत्रं मत्स्यनेत्रमिदं विदुः। अस्य प्रभावात् क्षितिपः कृत्स्नां साधयेद् महीम्॥ २५६॥
शिवलिङ्गसमं नेत्रं लिङ्गनेत्रमिदं विदुः। भर्त्तुः सर्वार्थसंसिद्ध्यै शत्रूणां नाशनाय च।
वामपार्श्वे तु यात्रायां धर्त्तव्योऽयं तथा रणे॥ २५७॥
(अत्र ध्वजार्द्धचन्द्रकलसानां लक्षणानि पतितानि)।
शूलाकृति यदा नेत्रं शूलनेत्रं वदन्ति तम्। सर्वार्थसाधकः सर्वारिष्टानिष्टप्रणाशनः॥ २५८॥
शार्दूलनेत्रं तं विद्यात् शार्दूलाकृतिनेत्रतः। शत्रुश्रेणी विनाशाय संग्रामे विजयाय च॥ २५९॥
सिंहाकृतिर्यदा नेत्रं सिंहनेत्रमिमं विदुः। अस्य प्रभावात्क्षीणोऽपि कृत्स्नां साधयते महीम्॥ २६०॥
तत् सिंहासननेत्रं स्यान्नेत्रे सिंहासनोपमे। अस्य प्रभावात् क्षितिपः कृत्स्नां साधयते महीम्॥ २६१॥
गजाकृतिर्यदा नेत्रं गजनेत्रं वदन्ति तम्। अस्य प्रभावात् क्षीणोऽपि लभते राजसम्पदम्॥ २६२॥

मण्डलेश्वर (अनेक देशों का राजा) और मण्डलेश्वर चक्रवर्ति=सारे संसार का सम्राट् हो जाता है, इसमें संशय नहीं है॥ २५३॥

पताका की आकृति सदृश खड्ग को पताका नेत्र (९) कहते हैं, यह सब धनैश्वर्यों को देनेवाला और संग्राम में विजय करानेवाला है॥ २५४॥

वीणा की आकृति सदृश नेत्रवाला खड्ग वीणा नेत्र (१०) कहलाता है। रात्रि और एकान्त में इस खड्ग से वीणा के समान स्वर निकलता है। इसके प्रभाव से वश में न आनेवाले भी सभी वश में आ जाते हैं॥ २५५॥

मत्स्य (मछली) की आकृति से युक्त नेत्रवाले खड्ग को मत्स्यनेत्र (११) कहते हैं। इसके प्रभाव से राजा सारी पृथ्वी को वश में कर लेता है॥ २५६॥

शिवलिङ्ग के समान नेत्रवाले खड्ग को लिङ्गनेत्र (१२) कहते हैं। यह खड्ग स्वामी के सब कार्यों का साधक और शत्रुओं का संहारक है। इसे यात्रा एवं रण (युद्धक्षेत्र) में बाईं ओर धारण करना चाहिये॥ २५७॥

[इस प्रकरण में ध्वज (१३) अर्धचन्द्र (१४) और कलस (१५) के लक्षण नहीं हैं।]

शूल (भाला) के सदृश आकृतिवाले को शूलनेत्र (१६) और इससे युक्त खड्ग शूलनेत्र खड्ग कहलाता है। यह सब कामों का साधक और सब सङ्कटों का नाशक है॥ २५८॥

शार्दूल (चीता) की आकृतिवाले खड्ग को शार्दूलनेत्र (१७) जानना चाहिये। यह शत्रु के समूह का नाशक और संग्राम में विजय दिलानेवाला है॥ २५९॥

सिंह की आकृतिवाला खड्ग सिंहनेत्र (१८) होता है। इसके प्रभाव से राजा समस्त पृथ्वी को अपने वश में कर लेता है॥ २६०॥

सिंहासन के सदृश नेत्रवाला सिंहासननेत्र (१९) कहलाता है। इसके प्रभाव से राजा समस्त पृथ्वी को वश में कर लेता है॥ २६१॥

गज (हाथी) की आकृतिवाला खड्ग गजनेत्र (२०) होता है। इसके प्रभाव से दुर्बल भी

Scanned by CamScanner

नेत्रं हंसाकृतिर्यदा हंसनेत्रं वदन्ति तम्। अस्य प्रभावात् भूपालो यशः प्राप्नोत्यनुत्तमम्॥ २६३॥
मयूराकृति नेत्रे द्वे तन्नेत्रमिति निर्दिशेत्। अस्य प्रभावान् मनुजः सर्पदर्पान् निषूदयेत्॥ २६४॥
जिह्वाकारं यदा नेत्रं जिह्वानेत्रं वदन्ति च। संग्रामखर्परेष्वयं पिबेद् वैरिशिरो रजः॥ २६५॥
दन्ताकारं यदा नेत्रं दन्तनेत्रं वदन्ति तम्। अयं रिपुगणं मूर्द्धनि चर्वयत्यतिभैरवम्॥ २६६॥
खड्गाकारं यदा नेत्रं खडगनेत्रं वदन्ति तम्। अस्य प्रभावात् मनुजस्त्रिलोकीं वशयेदपि॥ २६७॥
मनुष्यपुत्रिकाकारा पुत्रिका नेत्रमुच्यते। अयं सशैलां सद्वीपां कृत्स्ना साधयते क्षितीम्॥ २६८॥
न चेयं पुत्रिका किन्तु जयलक्ष्मीरिह स्वयम्। तस्मान्नायं मनुष्यानामल्पभाग्येन लभ्यते॥ २६९॥
चामराकृति नेत्रत्वात् तन्नेत्रमिति निर्दिशेत्। अस्य प्रभावात् जायन्ते चामरोद्धृतः सम्पदः॥ २७०॥
एकानेकशिखे शैलनेत्रे तन्नेत्रसंज्ञकम्। अपि राष्ट्रमये युद्धे विषमे वैरिसङ्कटे।
स्थिरी करोति धरणीं धरणीं पर्वतो यथा॥ २७१॥
पुष्पमालां समं नेत्रं पुष्पनेत्रं वदन्ति तम्। अस्य प्रभावात् तुष्यन्ति ग्रहाः सर्वाश्च देवताः॥ २७२॥

राजसम्पदा को प्राप्त कर लेता है॥ २६२॥

जब हंस की आकृतिवाला नेत्र हो तो उसे हंसनेत्र (२१) कहते हैं। इसके प्रभाव से राजा उत्तम यश की प्राप्ति करता है॥ २६३॥

मयूर (मोर) की आकृति के दो नेत्र होने पर खड्ग मयूरनेत्र (२२) कहलाता है। इसके प्रभाव से व्यक्ति सभी दर्प-(घमण्ड)-वालों का संहार कर सकता है॥ २६४॥

जिह्वा की आकृतिवाला खड्ग जिह्वानेत्र (२३) कहलाता है। इस चिह्न से युक्त खड्ग संग्रामरूपी कपालों में वैरि के शिर से निकला हुआ रक्तपान करता है॥ २६५॥

दन्त की आकृतिवाला खड्ग दन्तनेत्र (२४) कहलाता है, इस चिह्न से युक्त खड्ग का प्रभाव बड़ा भयानक होता है। यह शत्रु के शिर को चबा डालता है (भयानक आघात करता है)॥ २६६॥

खड्ग की आकृति अथवा गेंडे के सींग की आकृतिवाला खड्गनेत्र (२५) कहलाता है। यह खड्ग पर्वत-द्वीपोंसहित सारी पृथ्वी को विजय करता है॥ २६७॥

मनुष्य की आँख की पुतली-जैसे चिह्नवाला खड्ग पुत्रिकानेत्र (२६) कहलाता है। यह खड्ग पर्वत-द्वीपों-सहित सारी पृथिवी को विजय करता है। यह पुत्रिका न होकर स्वयं ही विजयश्री होती है। इसलिये इस खड्ग को मन्दभाग्यवाला प्राप्त नहीं कर सकता॥ २६८-२६९॥

चँवर की आकृतियुक्त खड्ग चामरनेत्र (२७) होता है। इसके प्रभाव से चामर द्वारा अर्जित सम्पति की प्राप्ति (राज्यप्राप्ति) होती है॥ २७०॥

एक या अनेक (बहुत) शिखाओं-(चोटियों)-वाले पर्वतचिह्न जिस खड्ग में दीखें उसे शैलनेत्र (२८) कहते हैं। यह खड्ग राष्ट्र में भय (आन्तरिक), विषम युद्ध में शत्रु द्वारा आपत्ति होने पर स्वराज्य को स्थिर रखता है, जैसे पृथ्वी को पर्वत स्थिर (सन्तुलित) रखते हैं॥ २७१॥

पुष्पमाला की आकृति से युक्त पुष्पनेत्र (२९) होता है। इसके प्रभाव से सभी ग्रह और देवता सन्तुष्ट हो जाते हैं॥ २७२॥

Scanned by CamScanner

भुजङ्गमसमे नेत्रे सर्पनेत्रमिदं मतम्। अयं शत्रुगणं हन्ति यथा मर्त्यं भुजङ्गमः॥ २७३॥
सवर्णमसवर्णञ्च तत् सर्वं द्विविधं भवेत्। सवर्णं शान्तिसम्पत्त्यै रिपुनाशे तथा परम्॥ २७४॥
द्वयोरेकत्रपृष्ठे च तत् पुनर्द्विविधं भवेत्। एकलोकसुखं नेदं ददाति द्विविधं द्वयोः॥ २७५॥
मूलमध्याग्रसंस्थानात्तत् पुनर्द्विविधं भवेत्। अग्रे चाग्र्यफलं ज्ञेयं मध्ये मध्यफलं मतम्॥ २७६॥
मूले फलं जघन्यं स्यात् प्राह नागार्जुनो मुनिः। एकं द्वे त्रीणि नेत्राणि नात्र संख्याव्यतिक्रमः॥ २७७॥
एकं धर्मस्वर्गकामौ द्वे त्रीणि च त्रिवर्गकम्। तत्फलानि प्रयच्छन्ति प्राह नागार्जुनो मुनिः॥ २७८॥
द्विनेत्रमिति जानीयात् स्वसंज्ञां नेत्रयोर्द्वयोः। त्रिनेत्रं त्रिभिर्ज्ञेयं बहुनेत्रमतः परम्॥ २७९॥
यथोत्तरं गुणवहं खड्गमाहुरनुत्तमम्। दिङ्नेत्रमिति निर्दिष्टं नेत्राणां शुभदायिनाम्॥ २८०॥
इति खड्गपरीक्षायां नेत्राध्यायः पञ्चमः। यथानेत्रस्य संस्थानं तथारिष्टस्य लक्षयेत्।
नेत्रेषु स्थाननियमो नारिष्टे स्थाननिर्णयः। प्रशस्ताङ्गोऽपि यः खड्गोऽरिष्टेनैकेन निन्दितः॥ २८१॥

अथ त्रिंशदरिष्टानां लक्षणानि—

छिद्रकाकपदे रेखा भिन्नं भेकश्च मूषिका। विडालः शर्करानीला मशको भृङ्गसूचकः॥ २८२॥

जिस खड्ग में काले सर्प के समान नेत्र दिखलाई दें, उसे सर्प नेत्र (३०) कहते हैं। यह सर्प के समान शत्रुओं का संहारक होता है॥ २७३॥

ये नेत्र सवर्ण (खड्ग के रूप-सदृश) और असवर्ण (भिन्नरूपवाले) दो प्रकार के होते हैं। सवर्ण नेत्र शान्ति और धन का हेतु है तथा असवर्ण शत्रु-नाशक है॥ २७४॥

जब ये नेत्र खड्ग के पृष्ठभाग पर दोनों ओर स्थित हों, तब ये द्विविध कहलाते हैं। ये द्विविध (दो लक्षणों से युक्त) केवल एक लोक का सुख नहीं देते अपितु दोनों (लोक-परलोक) में सुखदायक होते हैं॥ २७५॥

ये द्विविध नेत्र खड्ग के मूलभाग, मध्यभाग और अग्रभाग में हों तो अग्रभाग में होने से उत्तम फलदायक मध्य में, मध्यफलकारक और मूल में स्थित होने पर निकृष्टफल देनेवाले होते हैं। यह नागार्जुन मुनि ने कहा है॥ २७६॥

जब एक, दो या तीन नेत्र क्रमानुसार हों तो एक धर्म, दो स्वर्ग और काम तथा तीन त्रिवर्ग (धर्म-अर्थ-काम) का फल देते हैं। ऐसा नागार्जुन मुनि ने कहा है॥ २७७-२७८॥

दो नेत्रों से युक्त खड्ग द्विनेत्र, तीन से युक्त त्रिनेत्र और इनसे अधिक नेत्र होने पर बहुनेत्र कहलाता है॥ २७९॥

उत्तरोत्तर गुणों से युक्त खड्ग अद्वितीय होता है। इस अध्याय में शुभकारक नेत्रों का यहाँ दिग्दर्शन कराया गया है॥ २८०॥

(खड्ग परीक्षात्मक अध्याय में यह नेत्र नामक अध्याय समाप्त हुआ)।

जैसे नेत्र की स्थिति खड्ग पर होती है, ऐसे ही अरिष्ट (अशुभकारक चिह्न) भी होते हैं। नेत्रों के होने में स्थान-नियम (एक के पश्चात् समाङ्गुल पर होना प्रशस्त) कहा है, परन्तु अरिष्टों के लिए नियम नहीं है। प्रशस्त अङ्गवाला खड्ग भी एक अरिष्ट के होने से निन्दित हो जाता है॥ २८१॥

अब तीस अरिष्टों के लक्षण कहते हैं—छिद्र, काकपद, रेखा, भिन्न, मेंढक, मूषिका, विडाल,

Scanned by CamScanner

विन्दुश्च कालिकादेवी कपोतः काकविग्रहः। खर्परशकली चाथ क्रोडारिष्टं तथा कुलम्॥ २८३॥
जालारिष्टं करालाख्यं कङ्कखर्जूरशृङ्गकम्। गोपुच्छारिष्टखानित्रे लाङ्गलारिष्टमेव च॥ २८४॥
छिद्रवद् दृश्यते खड्गे स्वभावेन च लक्ष्यते। छिद्रारिष्टमिदं विद्धि भर्तुवीर्यबलापहम्॥ २८५॥
यदाकाकपदाकारमरिष्टं दृश्यते क्वचिद्। अयं काकपदारिष्टः सर्वाभीष्टविनाशनः॥ २८६॥
रेखाकारं यदारिष्टमूर्ध्वं वा तिर्यगेव वा। रेखारिष्टमिदं विद्धि भर्त्तुवीर्यबलापहम्॥ २८७॥
भिन्नभ्रान्तिकरं पापं भिन्नारिष्टमिदं विदुः। भर्त्तुः कुलं यशो राष्ट्रं नाहत्वा न व्रजेत् स्वयम्॥ २८८॥
यदा भेकशिरोरूपमरिष्टं दृश्यते क्वचित्। भेकारिष्टमिदं नाम्ना संग्रामे भयदायकम्॥ २८९॥
अरिष्टे मूषिकाकारे मूषिकारिष्टमुच्यते। अयं खड्गाधमः कुर्यात् पत्युः पातालसंगमम्॥ २९०॥
विडालनयनाकारो विन्दुरेकोऽतिविस्तरः। विडालारिष्टमेतत् स्यात् भर्तुः सर्वार्थः नाशनम्॥ २९१॥
अरिष्टं शर्कराकारं यदा स्पर्शेन बुध्यते। शर्करारिष्टमेतत् स्यात् धनबुद्धिविनाशनम्॥ २९२॥
कालिकारिष्टमित्येतद् धीधृतिस्मृतिनाशनम्॥ २९८॥
एकत्र यदि न ह्येषः प्रयत्नेनापि संवृत्तः। दारी नाम महारिष्टं सर्वाभीष्टविनाशनम्।
अनेकगुणसम्पन्नः खड्गो लोकैर्न गृह्यते॥ २९९॥

शर्करा, नीला, मशक, भृङ्ग, सूची, बिन्दु, कालिका, दारी, कपोत, काकविग्रह, खर्पर, शकली, क्रोड़ा, कुल, जाल, कराल, कङ्क, खर्जूर, शृङ्ग, गोपुच्छ, कुद्दाल (खनित्र), लाङ्गल—ये तीस अरिष्ट होते हैं॥ २८२-२८४॥

शेष आकृति स्वाभाविक होने पर भी जिस खड्ग में छिद्र हो उस अरिष्ट (दोष-त्रुटि) को छिद्रारिष्ट कहते हैं। यह अपने स्वामी के बल और वीर्य का नाशक है॥ २८५॥

जब कव्वे के पैर की आकृतिवाला चिह्न कहीं पर भी दिखाई पड़ता है तो उसे काकपद अरिष्ट कहते हैं। यह सभी सिद्धियों का नाशक हैं॥ २८६॥

ऊँची या तिरछी रेखा के आकारवाला रेखा-अरिष्ट जानना चाहिये। यह स्वामी के बल-वीर्य का नाशक है॥ २८७॥

भिन्न (विविध) प्रकार की भ्रान्ति (सन्देह) को उत्पन्न करनेवाला भिन्न-अरिष्ट कहलाता है। यह स्वामी के कुल, यश और राष्ट्र की समाप्ति किये बिना नहीं जाता॥ २८८॥

जब मेंढक के शिर के रूपवाला अरिष्ट कहीं पर भी दिखलाई दे तो उसे भेकारिष्ट कहते हैं। यह संग्राम में भयदायक होता है॥ २८९॥

मूषिका (चूहिया) के आकारवाला अरिष्ट मूषिकारिष्ट होता है। यह अधम खड्ग अपने स्वामी को पाताल में पहुँचा देता है॥ २९०॥

विडाल (बिल्ला) के नयन के सदृश बड़ा बिन्दु विडाल-अरिष्ट होता है। यह स्वामी के सभी कार्यों की समाप्ति करनेवाला है॥ २९१॥ जब छूने से शर्करा (छोटे कङ्कर) के समान प्रतीत हो तो इसे शर्करारिष्ट कहते हैं। यह धन और बुद्धि का नाशक है॥ २९२॥

कालिकारिष्ट (कृष्णतिल-सदृश बिन्दु) बुद्धि, धैर्य, स्मरणशक्ति का नाश करनेवाला है॥ २९८॥ यदि यह एक स्थान पर इकट्ठा नहीं है तो प्रयत्न में बाधा नहीं करता। दारी (बिवाई के समान खड्ग में दरारें दिखाई देना) नामवाला अरिष्ट सभी कामनाओं का नाशक है। यह अनेक गुणों से सम्पन्न होने पर भी ग्रहण करने के अयोग्य है॥ २९९॥

Scanned by CamScanner

कपोतपक्ष प्रतिममरिष्टं चेत् तदाह्वयम्। भर्तुः कुलं यशो विद्यां बलं बुद्धिञ्च नाशयेत्॥ ३००॥
काकाकृतिर्यदारिष्टं काकारिष्टं तदोच्यते। अनेन भर्तुः संग्रामे भङ्ग एवोपजायते॥ ३०१॥
अरिष्टे खर्परकारे खर्परारिष्टमुच्यते। भर्तुर्यशोबलं वीर्यं बुद्धिं प्रीतिञ्च नाशयेत्॥ ३०२॥
यदान्यल्लोह शकलं लग्नं स्यादिव लक्ष्यते। शकलीति स वै खड्गः सर्वाभीष्टनिषूदनः॥ ३०३॥
(क्रोडीकुशपत्रकयोर्लक्षणे पतिते)
यस्मिन् निम्नमिवाभाति मध्ये वा दृष्यते क्वचित्। जालारिष्टमिदं नाम भर्त्तुः कुलधनापहम्॥ ३०४॥
एकैकरेखा दीर्घाग्रा यदा पल्लविनी भवेत्। स्पर्शे वाथ करेणाथ करालारिष्टमुच्यते॥ ३०५॥
अयं हि क्षितिपालानां दृष्टियोग्यो भवेन्नहि। दर्शनादेव नश्यति यशो लक्ष्मीजयादयः॥ ३०६॥
अरिष्टे कङ्कपत्राभे कङ्कारिष्टं तदुच्यते। अस्य स्पर्शनमात्रेण नश्यत्यायुर्यशो बलम्॥ ३०७॥
खर्ज्जूरवृक्षप्रतिमं यदारिष्टस्तु लक्ष्यते। खर्जूरारिष्टमेतत् स्याद् भर्त्तुः कुलधनापहम्॥ ३०८॥
